## अज्ञातकर्तृकः
# शब्दसञ्चयः ॥

सं. मुनि धर्मकीर्तिविजयः

प्रवर्तक श्रीकान्तिविजय जैन शास्त्रसंग्रह-श्री आत्माराम जैन ज्ञानमन्दिर वडोदरा- नरसिंहजीनी पोलमांथी शब्दसंचय नामनी ३ हस्तप्रतो प्राप्त थई. आ ३ प्रतो सामे राखी प्रस्तुत कृतिनुं सम्पादन कर्युं छे. अद्यावधि शब्दरूपावली अनेक प्रकाशित थई चूकी छे. तथापि आ कृतिनुं महत्त्व ए छे के कर्ताए शब्दनां रूपोनी सिद्धि माटे एक ज स्थाने सिद्धहेमव्याकरण तथा कातन्त्रव्याकरणनां सूत्रोनो उपयोग कर्यो छे. स्वतन्त्रपणे सिद्धहेमव्याकरणनां सूत्रोनो उपयोग थयो होय, कोईक स्थाने कातन्त्र व्याकरणनां सूत्रोनो उपयोग तो कोईक स्थाने पाणिनीव्याकरणनां सूत्रोनो उपयोग थयो होय तेवुं जोवा मळे छे. परंतु एकज स्थाने सिद्धहेमव्याकरण अने कातन्त्रव्याकरणनां सूत्रोनो उल्लेख होय तेवी कृति भाग्ये ज जोवा मळे. प्रस्तुत कृतिमां बन्ने व्याकरणनो उपयोग करायो छे.

बीजुं एक कारण ए छे के आ कृति ५२१ वर्ष पूर्वे लखायेल छे. ते वखते पाणिनि, कातन्त्र, सारस्वत, भोज, ऐन्द्र, सिद्धहेम-इत्यादि अनेक व्याकरण प्रचलित हतां. पूर्वे जैनोमां सिद्धहेम, कातन्त्र तेमज सारस्वत व्याकरण विशेषे प्रचलित हतां. जो के आजे तो सिद्धहेम अने पाणिनि सिवायना व्याकरणनो उपयोग ज रह्यो नथी. अने तेथी ज सिद्धहेम अने कातन्त्र व्याकरणना सूत्रोना उल्लेखयुक्त कृति मळे ते महत्त्वनी वात बने छे.

प्रस्तुत कृतिना सम्पादनमां ३ हस्तप्रतोनो उपयोग करायो छे. तेमां शब्दसंचय, पत्र-१९-आ प्रतने A संज्ञा आपवामां आवी छे. आनी विशेषता ए छे के शब्दनां रूपोनी सिद्धि माटे विशेषे टिप्पणरूपे तो कुत्रचित् प्रतिमध्ये ज सिद्धहेम तथा कातन्त्र व्याकरणना सूत्रोनो उपयोग करवामां आवेल छे. आ कृति कर्ताए स्वहस्ते लखी छे ते महत्त्वनी वात छे. प्रत्यन्ते उल्लेख मळे छे – संवत १५४४ वर्षे भाद्रवा सुदि पूदिने श्रीपूर्णिमापक्षे श्रीश्रीभुवनप्रभसूरि वा० पूर्णकलशस्वहस्तेन लिखितम् । आ कृतिना कर्ता विषे अन्य कोई माहिती उपलब्ध थती नथी.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शब्दसंचय पत्र १८– आ प्रतिने B संज्ञा आपवामां आवी छे. आ प्रति अने A संज्ञक प्रति समान छे, फर्क एटलो ज छे के आ प्रतिमां कोईक कोईक स्थाने कातन्त्रव्याकरणनां सूत्रोनो उल्लेख तेमज कठिन शब्दोना अर्थ जणावेल छे. आमां कर्तादिनो कोई ज उल्लेख नथी.

शब्दसंचय तथा धातुपारायणावचूरि, पत्र–७ – आ प्रतिने C संज्ञा आपवामां आवेल छे. आ प्रतिमां शब्दोनां रूपनी सिद्धि माटे केवल सिद्धहेमव्याकरणनां सूत्रोनो ज उल्लेख छे. आ प्रतिमां दरेक शब्दोनां बधां रूपो नथी जणाव्यां, परंतु घणी वखत मुख्य मुख्य रूपो ज दर्शावेल छे. प्रत्यन्ते संख्यावाचकशब्दोनां रूपो, एवं धातु–प्रत्ययना अनुबन्धनुं फल जणावेल छे. आमां कर्तादिनो कोई ज उल्लेख मळतो नथी.

आ त्रणे प्रतिमां ज्यां शुद्धपाठ जणायो तेने ग्रहण करी अन्य पाठ टिप्पणमां पाठान्तर रूपे मूकेल छे. केटलांक स्थानोमां त्रणे हस्तप्रतमां अशुद्ध पाठ छे त्यारे मूलमां शुद्ध पाठ लखी टिप्पणमां त्रणे प्रतोना पाठ पाठान्तर रूपे मूकेल छे. पाठान्तर, शब्दरूपोनी सिद्धिनां सूत्रो तेमज कठिन शब्दोना अर्थ, जेमके रै = लक्ष्मी, ग्लौ = चन्द्र इत्यादिनो टिप्पणमां समावेश करायो छे. अहीं जे स्वयं उमेरो करायो छे तेने चोरस [ ] कौंस कर्यो छे. कोईक स्थाने टिप्पणनां सूत्रो अपूर्ण छे तेने [ ] कौंसमां उमेरी दीधा छे. बन्ने व्याकरणनां सूत्रोनो क्रमांक [ ] कौंसमां लखवामां आवेल छे. अने जे पाठ शुद्धीकरणरूपे लखेल छे तेने गोल ( ) कौंस करवामां आवेल छे.

विशेषता ए के A.B. संज्ञक प्रतिमां वृक्षशब्दनां रूपो छे तो C. संज्ञक प्रतिमां देवशब्दनां रूपो छे. आवुं अनेक स्थाने छे. अनेक स्थाने रूपोमां पण मतान्तर छे. जेमके – A.B. प्रति–वातप्रमी, C. प्रति – वातप्रम्यि, A.B. प्रति–सुमनः, C. प्रति–सुमनाः – इत्यादि ।

३–४ एवां स्थानो छे ज्यां स्पष्टता थती नथी त्यां प्रश्नार्थचिह्न करेल छे. २–३ टिप्पण एवी छे जे बिलकुल अवाच्य छे तेथी तेने छोडी दीधी छे.

अन्ते, आ प्रतिनी फोटोकोपी करी आपवा बदल श्री आत्माराम जैन ज्ञानमन्दिरना अग्रणीजनोनो आभार. फोटा श्रीमहेन्द्रभाई रमणलाल शाह, वडोदरा–वाळाए पाडी आप्या छे, तेमनो आभार.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# शब्दसञ्चयः

॥ ऍं नमः ॥

शब्दाम्भोधिसमुल्लास-रसिकं श्रीजिनं सदा[१] ।
नत्वा शिष्यप्रबोधाय लिख्यते **शब्दसञ्चयः** ॥१॥
[२]वृक्षादिसोमपादी वाऽग्न्यादिवातप्रमीमुखाः ।
शम्भ्वादिखलपूः पितृ-मुखाः से[३] रै[४]गोग्लौ[५] नरि[६] ॥२॥

तत्र प्रथममकारान्ताः ।
वृक्षदेवनरव्याघ्र-सिंहशार्दूलवायसाः ।
प्रासादल[७]गुडस्तम्भ-घटकुञ्जरनायकाः ॥१॥
चक्रवाकशरद्वीप-हंससारसवानराः ।
मेघनाविकमातङ्ग-मृगमीनतुरङ्गमाः ॥२॥
नृपकुम्भजनाः शूद्र-वैश्यक्षत्रियब्राह्मणाः ।
स्वर्गसूर्यग्रहाश्च[८]न्द्र-दैत्यव्यन्तरपन्नगाः ॥३॥
क्रोधमानमदा हर्ष-मोहलोभन[९]खाकराः ।
केशदेशनरेशाश्च महिषवृषभौ खराः[१०] ॥४॥
प[११]ट्टपादपधर्माश्च कान्तकामजिना[१२] नयः ।
चूतभूतखञ्जरीट-[१३]चटकोन्दरशूकराः ॥५॥
कोलमर्कटमण्डूक-पारापतपितामहाः ।
एवमन्येऽप्यकारान्ताः शब्दाः पुंसि प्रकीर्तिताः ॥६॥

---

१. पाठान्तरम् - मुदा - C. ।
२. पा० देवहाहामुनिग्राम-णीसाधुखलपूमुखाः ।
पितृयुजृपत्त्लृक्लाद्याः सेरैगोग्लौरतो नरे ॥ - C.
३. सह इना वर्तते इति से-कामेन - A. ।
४. लक्ष्मीः - A. ।
५. चन्द्रः - A. ।
६. पुंलिङ्गे - A. ।
७. पा० लकुट० - C. ।
८. पा० ०न्द्रादित्य० - C. ।
९. पा० नखाः कराः - C. ।
१०. पा० खरः - C. ।
११. पा० त्रिदशद्युशयौ धर्म० - C. ।
१२. पा० ०जना नयः - C. ।
१३. पा० ०वटकोटम्बुर० - A.B. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा[१]–

| | | |
|---|---|---|
| [२]वृक्षः | [३]वृक्षौ | [४]वृक्षाः |
| [५]वृक्षम् | वृक्षौ | [६]वृक्षान् |
| [७]वृक्षेण | [८]वृक्षाभ्याम् | [९]वृक्षैः |
| [१०]वृक्षाय | वृक्षाभ्याम् | [११]वृक्षेभ्यः |
| [१२]वृक्षात् | वृक्षाभ्याम् | वृक्षेभ्यः |
| [१३]वृक्षस्य | [१४]वृक्षयोः | [१५]वृक्षाणाम् |
| [१६]वृक्षे | वृक्षयोः | [१७]वृक्षेषु |
| सं० हे वृक्ष[१८] | हे वृक्षौ | हे वृक्षाः |

[१९]एवं देवादयोऽपि ज्ञातव्याः ।

[२०]अथाऽऽकारान्ताः ।

[२१]सोमपाः कीलालपाश्च वि[२२]षंखाः शङ्खध्माग्रेगौ[२३] ।

[२४]गोषा[२५]ब्जजावुदधिक्रा[२६] हाहाः पुंसि निवेदिताः ॥१॥

१. (प्रतौ वृक्षशब्दस्य रूपाणि न सन्ति, किन्तु तत्र देवशब्दस्य रूपाणि वर्तन्ते ।

२. रेफसोर्विसर्जनीयः [२-३-६३ कातन्त्रे] B.। ३. ओकारे औ औकारे च [१-२-९ का.] B.।

४. जसि [२-१-१५ का.] B.। ५. अकारे लोपम् [२-१-१९ का.] B.।

६. शसि सस्य च नः च [२-१-१६ का.] B.। ७. इन टा [२-१-२३ का.] B.।

८. अकारो दीर्घं [घोषवति १-२-९ का.] B.। ९. भिसैस् वा [२-१-१८ का.] B.।

१०. ङेर्यः [२-१-२४ का.] अकारो दीर्घं [घोषवति २-१-१४ का.] B.।

११. धुटि बहुत्वे त्वे [२-१-१९ का.] B.। १२. ङसिरात् [२-१-२१ का.] B.।

१३. ङस् स्य [२-१-२२ का.] B.। १४. ओसि च [२-१-२० का.] B.।

१५. आमि च नुः [२-१-७२ का.] अकारो दीर्घं [घोषवति २-१-१४ का.] B.।

१६. अवर्ण इ[वर्णे ए १-२-२ का.] B.।

१७. धुटि ब[हुत्वे त्वे २-१-१९ का.] नामिकरपरः [(३) प्रत्ययविकारागमस्थः सिः (४) षं नुविसर्जनीयषान्तरोऽपि २-४-४७ का.] B.।

१८. आमन्त्रणार्थाभिद्योतको हिशब्दः प्रागुपादीयते ।
ह्रस्वनदीश्र[द्धाभ्यः सिर्लोपम् २-१-७१ का.] B.।

१९. पा० एवं वृक्षादयोऽपि ज्ञेयाः C. ।

२०. अग्रेगा उदधिक्राश्च विषखाश्च तथा गोषा(षाः) ।
श्रियं दधतु राजेन्द्र ! अब्जजासहिता इमे ॥ B. ।

२१. विप्रः A. । २२. शम्भुः A.B. । २३. अरुणः A. , इन्द्रः B. ।

२४. रविः A.B. । २५. ब्रह्मा A.B. । २६. हनुमान् A. , विष्णुः B. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| सोमपाः[१] | सोमपौ[२] | सोमपाः |
| सोमपाम् | सोमपौ | सोमपः[३] |
| सोमपा | सोमपाभ्याम् | सोमपाभिः |
| सोमपे | सोमपाभ्याम् | सोमपाभ्यः |
| सोमपः | सोमपाभ्याम् | सोमपाभ्यः |
| सोमपः | सोमपोः | सोमपाम् |
| सोमपि | सोमपोः | सोमपासु |
| सं० हे सोमपाः | हे सोमपौ | हे सोमपाः |

एवं कीलालपादयः सप्त ।

| | | |
|---|---|---|
| हाहाः[४] | हाहौ | हाहाः |
| हाहाम् | हाहौ | हाहः[५] |
| हाहा | हाहाभ्याम् | हाहाभिः |
| हाहे | हाहाभ्याम् | हाहाभ्यः |
| हाहः | हाहाभ्याम् | हाहाभ्यः |
| हाहः | हाहोः | हाहाम् |
| हाहि | हाहोः | हाहासु |
| सं० हे हाहाः | हे हाहौ | हे हाहाः |

१. C. प्रतौ सोमपाशब्दस्य रूपाणि न सन्ति ।

२. सोमपाप्रभृतीनां शब्दानां स्वरे सन्धिकार्यमेव B. ।

३. लुगातोऽनापः [२-१-१०९ सिद्धहेमे] आलोपः । आ धातोरधुट्स्वरे [२-२-५५ का.] आ लोपः A. ।
अघुट्स्वरे तु आ धातोरघुट्स्वरे [२-२-५५ का.] इत्यन्तलोपः B. ।

४. अमरकोशे - हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम् ।
हाहाशब्दस्याऽधात्वाकारेऽपि अन्तलोपः ।

तथा चोक्तम्- प्रायोवृत्तिं समाश्रित्य धातोरिति खलूच्यते ।
आकारमेकं सन्त्यज्य सर्वस्याऽन्यस्य सङ्ग्रहः ॥

तथा च दीपके प्रोक्तम्- किं विस्तृया (?) तोऽन्य आकारो धातुबाह्योऽपि लुप्यते ।
स्वरे स्यादेरघुट्यग्रे क्त्वो यप् हाहेति तद्यथा ॥

समासे भाविन्यनञः क्त्वो यप् [३-२-१५४ सि०] इति निर्देशात् ।

५. लुगातोऽनापः [२-१-१०७ सि.] इति सूत्रेणाऽऽकारलोपः C. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ इकारान्ताः ।

[1]अग्निरञ्जलिरम्भोधि-रंह्रिर्योनिर्मुनिर्ध्वनिः ।
समाधिर्दुन्दुभिर्व्रीहि-रतिथिः सारथिर्गिरिः ॥१॥
[3]हरिः शौरिर्विरञ्चिश्च विधिररिः कपिः कविः ।
कुक्षिः सन्धिः कलिः शालि-[4]र्धृतिर्विमतिर्वृष्ल(ष्ण?)यः ॥२॥
[5]पाणिर्दीदिविर्व(व)ह्नी च घृणिर्ग्रन्थिरवी रविः ।
अद्रिः सेवधिरो[6]धिश्च व्याधिर्मणिरहिः कृमिः[7] ॥३॥
इषुधिर्जलधिश्चालि-र्भूपतिः श्रीपतिस्तिमिः ।
[8]शरधिर्वर्द्धि[9]रश्म्यादि-र्वा द्वयोऽमी इतो नरे ॥४॥

| | | |
|---|---|---|
| [10]अग्निः | अग्नी[11] | अग्नयः[12] |
| [13]अग्निम् | अग्नी | अग्नीन्[14] |
| [15]अग्निना | अग्निभ्याम् | अग्निभिः |
| [16]अग्नये | अग्निभ्याम् | अग्निभ्यः |
| [17]अग्नेः | अग्निभ्याम् | अग्निभ्यः |

---

१. पा० मुनिः C. ।
२. पा० हरिः C. ।
३. पा० अग्निः C. ।
४. पा० दृतिः C. ।
५. पा० पाणिदीदि० B., पाणिर्दीविविव० C. ।
६. पा० राधिसूर्याधि० A.B. ।
७. पा० क्रमिः A.B. ।
८. भाथउ A. ।
९. पा० ०र्वर्द्धिरस्मादिर्वा A.B., ०र्वर्धकिरश्म्यादिर्वा C. ।
१०. C. प्रतौ अग्निशब्दस्य रूपाणि न सन्ति, किन्तु तत्र मुनिशब्दस्य रूपाणि वर्तन्ते ।
११. इदुतोऽस्त्रेरीदूत् [सि० १-४-२१] A., औकारः पूर्वम् [२-१-५१ का.] A.B. ।
१२. जस्येदोत् [सि० १-४-२२] A., इरेदुरोज्जसि [२-१-५५ का.] A.B. ।
१३. अग्नेरमोऽकारः [२-१-५० का.] A.B. ।
१४. शसोऽता सश्च नः पुंसि [सि० १-४-४९] दीर्घ A., शसोऽकारः सश्च नोऽस्त्रियाम् [२-१-५२ का.] A. । शसोऽकार सश्च नोऽस्त्रियाम्, [२-१-५२ का.] सस्य न, B.।
१५. टः पुंसिना [सि० १-४-२४] टा ना A., टा ना [२-१-५३] A.B. ।
१६. ङित्यदिति [सि० १-४-२३] A., ङे [२-१-५७ का.] इकार एकारः A. । ङे [२-१-५७ का.] B. ।
१७. ङसिङसोरलोपश्च [२-१-५८ का.] A.B.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| अग्नेः | अग्न्योः | अग्नीनाम्[१] |
| [२]अग्नौ | अग्न्योः | अग्निषु |
| सं० हे अग्ने ! | हे अग्नी | हे अग्नयः |

एवमञ्जल्यादयः ।

अथ ईकारान्ताः ।

[३]वातप्रमीः [४]पाथपपीः सेनानीः ग्रामणीस्तथा[५] ।
देवयजीः यवक्रीश्चाऽग्रणीरीतः (रेते) स्मृता नरे ॥

| | | |
|---|---|---|
| [६]वातप्रमीः | वातप्रम्यौ | वातप्रम्यः |
| [७]वातप्रमीम् | वातप्रम्यौ | वातप्रमीन्[८] |
| वातप्रम्या | वातप्रमीभ्याम् | वातप्रमीभिः |
| वातप्रम्ये | वातप्रमीभ्याम् | वातप्रमीभ्यः |
| वातप्रम्यः | वातप्रमीभ्याम् | वातप्रमीभ्यः |
| वातप्रम्यः | वातप्रम्योः | वातप्रम्याम् |
| [९]वातप्रम्यि | वातप्रम्योः | वातप्रमीषु |
| सं०हे वातप्रमीः | हे वातप्रम्यौ | हे वातप्रम्यः |

एवं पाथपपीः देवयजीः ।

१. ह्रस्वापश्च [सि० १-४-३२] आम् नाम्, दीर्घो नाम्यतिसृ-चतसृष्रः [सि० १-४-४७] A. । आमि च नुः [२-१-७२ का.] नुरागमः, दीर्घमामि सनौ [२-२-१५ का०] A. । आमि च नुः [२-१-७२ का.], दीर्घमामि सनौ [२-२-१५ का.] B.।
२. ङिर्डौ [सि० १-४-२५] A. । ङिरौ सपूर्वः [२-१-६० का०] A.B.।
३. हिरणः A. । 'वातातिमुखगामुको मृग उच्यते' B. ।
४. वडवानलः A. । पा० पाथःपापीः C. ।
५. पा० प्रधीः C. ।
६. मांक्-माने' ता वा तत्र प्र०-वातं प्रमिमीते वातप्रमी A. ।
७. समानादमोऽतः [सि० १-४-४६] इति सूत्रेणाऽकारलोपः A.B. । समानादमोऽतः [सि० १-४-४६] C. ।
८. शसोऽता सश्च नः पुंसि [सि० १-४-४९] इति सूत्रेण शसोः अकारलोपः सकारसः नश्चेति A.B. । शसोऽता सश्च नः पुंसि [सि० १-४-४९] C. ।
९. पा० वातप्रमी A.B., टि० 'समानानां तेन दीर्घः [सि० १-२-१] A.B. । वातप्रमी। वातप्रमीसदृशानामनदीभ्यामीदूद्भ्याममृशसोरादिर्लोपः सस्य च नः । सप्तम्येकवचने समानः सवर्णे दीर्घ [र्घीभवति परश्च लोपम् १-२-१ का०] । अन्यत्र इवर्णो यम् [यमसवर्णे न च परो लोप्यः १-२-८] इत्यादिना सन्धिः B.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| सेनानीः | सेनान्यौ[१] | सेनान्यः |
| [२]सेनान्यम् | सेनान्यौ | सेनान्यः |
| सेनान्या | सेनानीभ्याम् | सेनानीभिः |
| सेनान्ये | सेनानीभ्याम् | सेनानीभ्यः |
| सेनान्यः | सेनानीभ्याम् | सेनानीभ्यः |
| सेनान्यः | सेनान्योः | सेनान्याम् |
| [३]सेनान्याम् | सेनान्योः | सेनानीषु |
| सं० हे सेनानीः | हे सेनान्यौ | हे सेनान्यः |

एवं प्रधीः । सप्तम्यां तु प्रध्यि प्रध्योः प्रधीषु ।

| | | |
|---|---|---|
| [४]यवक्रीः | [५]यवक्रियौ | यवक्रियः |
| यवक्रियम् | यवक्रियौ | यवक्रियः |
| यवक्रिया | यवक्रीभ्याम् | यवक्रीभिः |
| यवक्रिये | यवक्रीभ्याम् | यवक्रीभ्यः |
| यवक्रियः | यवक्रीभ्याम् | यवक्रीभ्यः |
| यवक्रियः | यवक्रियोः | यवक्रियाम् |
| यवक्रियि | यवक्रियोः | यवक्रीषु |
| सं०हे यवक्रीः | हे यवक्रियौ | हे यवक्रियः |

एवं नी-सुधी-विमलधियः ।

| | | |
|---|---|---|
| [६]सुधीः | [७]सुधियौ | सुधियः |
| सुधियम् | सुधियौ | सुधियः |

१. योऽनेकस्वरस्य [सि० २-१-५६] यत्वम् A. ।

२. एवं सेनानी अग्रणी ग्रामणी, परम् अम्-शस्-ङि विशेषः । सेनान्यं, सेनान्यः योऽनेकस्वरस्य [सि० २-१-५६] यत्वम् । निय आम् [सि० १-४-५१] ङेराम् । एवं प्रधीः । सप्तम्यां तु प्रध्यि प्रधीषु । एवं यवक्री सुधी नी विमलधी इति पाठः C.प्रतौ अस्ति ।

३. निय आम् [सि० १-४-५१], नियो ङिराम् [२-१-७७ का.] A.।

४. C.प्रतौ यवक्रीशब्दस्य रूपाणि' न सन्ति ।

५. संयोगात् [सि० २-१-५२] A., ईदूतोरियुवौ स्वरे [२-२-५६ का.] इत्यादेशे A.। स्वरे सर्वत्र ईदूतोरियुवौ स्वरे [२-२-५६ का.] इत्यादेशे B. ।

६. A B प्रतौ सुधीशब्दस्य रूपाणि न सन्ति ।

७. धातोरिवर्णो [वर्णस्येयुव् स्वरे प्रत्यये सि० २-१-५०] इयादेशः C.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| सुधिया | सुधीभ्याम् | सुधीभिः |
| सुधिये | सुधीभ्याम् | सुधीभ्यः |
| सुधियः | सुधीभ्याम् | सुधीभ्यः |
| सुधियः | सुधियोः | सुधियाम् |
| सुधियि | सुधियोः | सुधीषु |
| [सं० हे सुधीः] | [हे सुधियौ] | [हे सुधियः] |

[1]यवक्री, संयोगात्, एवमन्येऽपि ।

अथ उकारान्ताः ।

[2]शम्भुर्विभुः प्रभुः स्थाणुः फेरुर्किसारुकारवः ।
इक्षुभिक्षुहिमांश्वोतु- वायुगोमौयुमायवः ॥१॥
[4]साधुर्विभुरिपुन्यङ्कु-[5]वेणुरेणुहरेणवः ।
क्रतुः केतुस्तरुर्मेरु-र्जानुपीलुकृशानवः ॥२॥
भानुः स्वर्भानुः शङ्कुश्च शीतांशुर्गुग्गलुर्बटुः ।
हिङ्गुलुर्गुरुशत्रू च बाहुकम्बुरुतुम्बरुः[6] ॥३॥
तन्तुधात्वंसुसेत्विन्दु-र्वमथुर्वेपथुस्तथा ।
सूनुर्बिन्दुश्च दवथु-रुदन्ताः पुंसि कीर्तिताः ॥४॥

| | | |
|---|---|---|
| [7]शम्भुः | [8]शम्भू | शम्भवः[9] |
| [10]शम्भुम् | शम्भू | शम्भून् |

---

१. A.B. प्रतौ एष पाठः नास्ति । २. पा० साधुः C. ।
३. शृगालः A. । ४. शम्भुः C. ।
५. वेणु....करेणवः C. । ६. पा० तून्दरु A.B. ।
६. पा० तून्दरु ।
७. C. प्रतो साधुशब्दस्य रूपाणि न सन्ति ।)
८. इदुतोऽस्त्रेरीदूत् [सि० १-४-२१], औकारः पूर्वम् [२-१-५१ का०] A.। शम्भु-शब्दस्याऽग्निवत् प्रक्रिया B. ।
९. जस्येदोत् [सि० १-४-२२], इरेदुरोज्जसि [२-१-५५ का.] A. ।
१०. समानादमोऽतः [सि० १-४-४६] अकारलोपः A. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| [१]शम्भुना | शम्भुभ्याम् | शम्भुभिः |
| [२]शम्भवे | शम्भुभ्याम् | शम्भुभ्यः |
| [३]शम्भोः | शम्भुभ्याम् | शम्भुभ्यः |
| शम्भोः | शम्भ्वोः | शम्भूनाम् |
| शम्भौ | शम्भ्वोः | शम्भुषु |
| सं० हे शम्भो | हे शम्भू | हे शम्भवः |

[४]अथ ऊकारान्ताः ।

[५]खलपूर्यवलूर्हूहूः नग्न[६]हूः कटप्रूः स्वयंभूः ।
प्रतिभूर्मनोभू .... रूदन्ताः पुंसि कीर्तिताः ॥

| | | |
|---|---|---|
| खलपूः | [७]खलप्वौ | खलप्वः |
| खलप्वम् | खलप्वौ | खलप्वः |
| खलप्वा | खलपूभ्याम् | खलपूभिः |
| खलप्वे | खलपूभ्याम् | खलपूभ्यः |
| खलप्वः | खलपूभ्याम् | खलपूभ्यः |
| खलप्वः | खलप्वोः | खलप्वाम् |
| खलप्वि | खलप्वोः | खलपूषु |
| सं०हे खलपूः | हे खलप्वौ | हे खलप्वः |

एवं यवलूः ।

---

१. टः पुंसिना [सि० १-४-२४] A. । २. ङे [२-१-५७ का.] उकार ओकार A. ।

३. ङसिङसोरलोपश्च [२-१-५८ का.] A. ।

४. C. प्रतौ एषः श्लोको नास्ति, किन्तु "लूर्हूहूः खलपूर्नग्नहूर्यवलूः कटप्रुवः" । एवं कटप्रू स्वयंभूप्रभृतयः - इति पाठोऽस्ति ।

५. सज्जनः A. ।

६. मद्यबीजम् A. ।

७. खलपूशब्दस्य धातूदन्तत्वाद् अनेकाक्षरयो [स्त्वसंयोगाद्यवौ २-२-५९ का.] इत्यादिना स्वरे वत्वम् B.।
'खलपूः स्याद् बहुकरः' B.।
स्यादौ वः [सि० २-१-५७] C.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| [१]नग्नहूः | [२]नग्नह्वौ | नग्नह्वः |
| [३]नग्नहूम् | नग्नह्वौ | [४]नग्नहून् |
| नग्नह्वा | नग्नहूभ्याम् | नग्नहूभिः |
| नग्नह्वे | नग्नहूभ्याम् | नग्नहूभ्यः |
| नग्नह्वः | नग्नहूभ्याम् | नग्नहूभ्यः |
| नग्नह्वः | नग्नह्वोः | नग्नह्वाम् |
| नग्नह्वि | नग्नह्वोः | नग्नहूषु |
| सं० हे नग्नहूः | हे नग्नह्वौ | हे नग्नह्वः |

एवं हूहूः ।

| | | |
|---|---|---|
| कटप्रूः | [५]कटप्रुवौ | कटप्रुवः |
| कटप्रुवम् | कटप्रुवौ | कटप्रुवः |
| कटप्रुवा | कटप्रूभ्याम् | कटप्रूभिः |
| कटप्रुवे | कटप्रूभ्याम् | कटप्रूभ्यः |
| कटप्रुवः | कटप्रूभ्याम् | कटप्रूभ्यः |
| कटप्रुवः | कटप्रुवोः | कटप्रुवाम् |
| कटप्रुवि | कटप्रुवोः | कटप्रूषु |
| सं०हे कटप्रूः | हे कटप्रुवौ | हे कटप्रुवः |

एवं स्वयंभूप्रभृतयः ।

---

१. एवं नग्नहूः, हूहूः, परम् अम्-शस् विशेषः हूहूं हूहून् । अन्यानि रूपाणि न सन्ति C. ।
२. वमुवर्णः [१-२-९ का.] इति वत्वे A.B. ।
३. समानादमोऽतः [सि० १-४-४६] A. ।
४. पुंसीदूद्भ्यां सश्च न । पुंलिङ्गे इकारान्त उकारान्त परइ अम्-शस्‌तणा अकार लोप पामइ । अनइ सकार रहइ नकार हुइ A.B. ।
शसोऽता सश्च नः पुंसि ईदूद्भ्यामिति न स्याताम्, अनदीभ्यां नस्य च ।
"अकारो लोपतां याति सकारस्य नकारताम्" A.।
हूहू-नग्नहूप्रभृतीनाम् अनदीभ्याम् ईदूद्भ्याम् अम्-शसोरादिर्लोपः सस्य च नः । तथा नदीत्वास्पर्शाद् वमुवर्ण इति सन्धिः B.।
५. संयोगात् [सि. २-१-५२], ईदूतोरियुवौ स्वरे [२-२-५६ का.] उवादेशे A.। कटप्रूशब्दस्य संयोगपरत्वाद् वत्वं न । भ्रूशब्दस्यैकाक्षरत्वाद् वत्वं न प्राप्तम्, ईदूतोरियुवौ स्वरे [२-२-५६ का.] उवादेशे B.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ ऋकारान्ताः ।

पिता धाता[१] विधाता ना[२] नप्ता ध्येता तथोद्गता[३] ।
[४]स्रष्टा क्षत्ता च पोता च होता शास्ता ऋतो नरे ॥

| | | |
|---|---|---|
| [५]पिता | [६]पितरौ | पितरः |
| पितरम् | पितरौ | [७]पितॄन् |
| पित्रा | पितृभ्याम् | पितृभिः |
| पित्रे | पितृभ्याम् | पितृभ्यः |
| [८]पितुः | पितृभ्याम् | पितृभ्यः |
| पितुः | पित्रोः | [९]पितॄणाम् |
| [१०]पितरि | पित्रोः | पितृषु |
| सं० हे पितः[११] | हे पितरौ | हे पितरः |
| [१२]धाता | [१३]धातारौ | धातारः |

१. पा० माता C. । २. पा० च A.B.। ३. पा० तथोता च A.B.।
४. पा० त्वष्टा क्षत्त्वा च A.B. । सृष्टा क्षप्ता च० C. ।
५. ऋदुशनस्-पुरुदंशोऽनेहसश्च [सेर्डाः सि० १-४-८४] A.। आ सौ सिलोपश्च [२-१-६४ का.] अन्त आ A.B.।
६. अर्डौ च [सि० १-४-३९] ऋकारान्तशब्द... घुटनिमित्त भूइ A.। घुटि च [२-१-६९ का.] तर् B.।
७. शसोऽता सश्च नः पुंसि [सि० १-४-४९], अग्निवच्छसि [२-१-६५ का०] A.। अग्निवच्छसि [२-१-६५ का०] इत्यग्निवद् भावात् शसो ऋकार ऋकार सस्य च नः, समान [न सवर्णे दीर्घीभवति परश्च लोपम् १-२-१ का०] इति दीर्घः B.।
८. ऋतो डुर् [सि० १-४-३७] ङस्स्थाने उर्, ऋदन्तात् सपूर्वः [२-१-६३ का०] A.। ऋदन्तात् सपूर्वः [२-१-६३ का०] इति सह ङसिङसो ऋकारेण उत्वम् B.।
९. ह्रस्वापश्च [सि० १-४-३२] आम्स्थाने नाम्, दीर्घो नाम्यतिसृ-चतसृ-ष्रः [सि० १-४-४७] A.। आमि च नुः [२-१-७२ का०] नुरागमः, दीर्घमामि सनौ [२-२-१५ का०] दीर्घः B.।
१०. अर्डौ [२-१-६६ का०] A.। अर्डौ [२-१-६६ का०] इति अर् B.।
११. आमन्त्रणे आ च न संबुद्धौ [२-१-७० का०] इति अर् B.।
१२. आ सौ सिलोपश्च [२-१-६४ का०] B.।
१३. धातोस्तृशब्दस्याऽर् [२-१-६८ का०] शेषं पितृवत् B.। तृ-स्वसृ-नप्तृ-नेष्टृ [त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्त्रो घुट्यार्] [सि० १-४-३८] धाता, धातारो, धातॄन् धात्रा० इति रूपाणि एव सन्ति C.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| धातरम् | धातारौ | धातॄन् |
| धात्रा | धातृभ्याम् | धातृभिः |
| धात्रे | धातृभ्याम् | धातृभ्यः |
| धातुः | धातृभ्याम् | धातृभ्यः |
| धातुः | धात्रोः | धातॄणाम् |
| धातरि | धात्रोः | धातृषु |
| सं०हे धातः | हे धातारौ | हे धातारः |

एवं विधातृप्रभृतयः ।

अथ [1]ॠकारान्ताः ।

| | | |
|---|---|---|
| युजॄः | युज्रौ | युज्रः |
| युजॄम् | युज्रौ | युजॄन् |
| युज्रा० | युजॄषु | |

एवं छिदॄः भिदॄः ।

अथ [2]ऌकारान्ताः ।

| | | |
|---|---|---|
| पत्लृः | पत्लौ | पत्लः |
| पत्लम् | पत्लौ | पत्लृन् |

एवं सर्वत्राऽपि । गम्लृ–घस्लृप्रमुखा अप्येवम् ।

अथ [3]ॡकारान्ताः ।

| | | |
|---|---|---|
| क्लृः | क्लौ | क्लः |
| पत्लृवत् | | |

अथ एकारान्ताः ।

| | | |
|---|---|---|
| [4]सेः | [5]सयौ | सयः |
| सयम् | सयौ | सयः |
| सया | सेभ्याम् | सेभिः |

---

१.२.३. A.B. प्रतौ एतानि रूपाणि न सन्ति ।

४. स इना कामेन वर्तते से । कामी स्मरः प्रिया वा । स विसर्गः B.।

५. स्वरे ' ए अय्' [१-२-१२] सयौ B.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| सये | सेभ्याम् | सेभ्यः |
| [1]सेः | सेभ्याम् | सेभ्यः |
| सेः | सयोः | सयाम् |
| सयि | सयोः | सेषु |
| सं०हे से | हे सयौ | हे सयः |

अथ ऐकारान्ताः ।

| | | |
|---|---|---|
| [2]राः | [3]रायौ | रायः |
| रायम् | रायौ | रायः |
| राया | राभ्याम् | राभिः |
| राये | राभ्याम् | राभ्यः |
| रायः | राभ्याम् | राभ्यः |
| रायः | रायोः | रायाम् |
| रायि | रायोः | रासु |
| सं०हे राः | हे रायौ | हे रायः |

अथ ओकारान्ताः

| | | |
|---|---|---|
| [4]गौः | गावौ | गावः |
| [5]गाम् | गावौ | [6]गाः |
| गवा | गोभ्याम् | गोभिः |
| गवे | गोभ्याम् | गोभ्यः |

१. एदोद्भ्यां चेति एकारान्त ओकारान्त सविहु शब्द परइ ङसिर्ङस्तणा अकारनउ लोप हुइ । ... सह इना वर्तते इति सः, तस्मात्तस्य वा सेः । ङसिङस् फक्किकायमकारलोपः A.। मतान्तरे एदोदन्तान् ङसिङसोरलोपो वा स्यात् B.।

२. आ रायो व्यञ्जने [सि० २-१-५] एकारनइं आकार A.। रैशब्दो द्रव्यवाची । आत्वं व्यञ्जनादौ [२-३-१८ का०], विभक्तौ 'रैः' [२-३-१९ का०] इत्यात्वम्, सः विसर्गः B.।

३. ऐकारान्त सर्वत्र शब्द रहइं एदैतोऽयाय् [१-२-२३] पामइ, सूत्र हैमः A.। स्वरे 'ए अय्' [१-२-१२ का०] B.।

४. ओत औ [सि० १-४-७४] इति ओकारनइं गोरौ घुटि [२-२-३३ का०] औकारः A.। गोरौ घुटि [२-२-३३ का०] औ, सः विसर्गः B.।
दृग्दृष्टिदीधितिस्वर्ग-वज्रवाग्बाणवारिषु । भूमौ पशौ च गोशब्दो बिम्बनिर्देशसम्भृत ॥

५. अम्शसोरा [२-२-३४ का०] A.। अम्शसोरा [२-२-३४ का०] अन्त आ B.।

६. अम्शसोरा [२-२-३४ का०] अन्त आ B.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| [1]गो: | गोभ्याम् | गोभ्य: |
| [2]गो: | गवो: | गवाम् |
| गवि | गवो: | गोषु |
| सं०हे गौ: | हे गावौ | हे गाव: |

अथ औकारान्ता: ।

| | | |
|---|---|---|
| [3]ग्लौ: | [4]ग्लावौ | ग्लाव: |
| ग्लावम् | ग्लावौ | ग्लाव: |
| ग्लावा | ग्लौभ्याम् | ग्लौभि: |
| ग्लावे | ग्लौभ्याम् | ग्लौभ्य: |
| ग्लाव: | ग्लौभ्याम् | ग्लौभ्य: |
| ग्लाव: | ग्लावो | ग्लावाम् |
| ग्लावि | ग्लावो: | ग्लौषु |
| सं० हे ग्लौ: | हे ग्लावौ | हे ग्लाव: |

एवं स्वरान्ता: शब्दा: पुंलिङ्गा: समाप्ता: ।

★ ★ ★

अथ स्त्रीलिङ्गा: स्वरान्ता: शब्दा: कथ्यन्ते ।

[5]श्रद्धाद्या बुद्धिमुखाश्च नद्याद्या धेनुमुख्यका: ।
वधूप्रभृतयो मातृ-मुख्या द्योनौ: स्वरा: स्त्रियाम् ॥१॥

तत्र प्रथममाकारान्ता: ।

[6]श्रद्धा माला शाला रम्भा भम्भा सुरा शिषा हेला ।
मन:शिला वामा [7]अजा आदन्ता: कीर्तिता: स्त्रियाम् ॥१॥

| | | |
|---|---|---|
| [8]श्रद्धा | [9]श्रद्धे | श्रद्धा: |

१. गोश्च [२-१-५९ का०] ङसिङसोरलोप: । एदोद्भ्यां ङसिङसो र: [सि० १-४-३५] ।
२. गोश्च [२-१-५९ का०] अ इतिसूत्रेण लोप: B.।
३. ग्लौशब्दश्चन्द्रवाची, विसर्ग: B.। ४. स्वरे 'औ आव्' [१-२-१४ का०] B.।
५. शालाद्या C.। ६. श्लोको नास्ति C.।
७. एष: पाठो नास्ति A.।
८. श्रद्धाया: सिर्लोपम् [२-१-३७ का०] A.B.। शालाशब्दस्य रूपाणि वर्तन्ते C.।
९. औता [१-४-२०] ईणइं आकार एकार हैम. A.। औरीम् [२-१-४१ का०] औई, अवर्ण इवर्णे ए [१-२-२ का०] A.। औरीम् [२-१-४१ का०] B.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| श्रद्धाम् | श्रद्धे | श्रद्धाः |
| [१]श्रद्धया | श्रद्धाभ्याम् | श्रद्धाभिः |
| [२]श्रद्धायै | श्रद्धाभ्याम् | श्रद्धाभ्यः |
| श्रद्धायाः | श्रद्धाभ्याम् | श्रद्धाभ्यः |
| श्रद्धायाः | [३]श्रद्धयोः | [४]श्रद्धानाम् |
| श्रद्धायाम् | श्रद्धयोः | श्रद्धासु |
| [५]सं०हे श्रद्धे | हे श्रद्धे | हे श्रद्धाः |

एवं [६]शाला-जाया-मालादयः ।

अथ इकारान्ताः ।

बुद्धिः शक्तिर्मतिर्धूलि[७]-र्वेणिनिःश्रेणिश्रेणयः ।
दुन्दुभिर्भूमिपाल्यालि-र्दविः कान्तिः [९]छविः कृषिः ॥१॥
[१०]सृणिरश्रिस्तडिर्नेमि-राजिरा[११]टिवृतिर्वृत्तिः ।
मुखंढि [१२]दालिपङ्क्ती च रात्रिर्गति[१३]र्धृति[१४]ःस्तुतिः ॥२॥
[१५]ऋद्धिर्वृद्धिः स्मृतिर्गृष्टि-रजनिर्घृष्टि[१६]ः सङ्गतिः ।
इकारान्ताः स्मृताः प्राज्ञैः स्त्रीलिङ्गाः पूर्वसूरिभिः ॥३॥

| | | |
|---|---|---|
| बुद्धिः | [१७]बुद्धी | [१८]बुद्धयः |

१. टौसोरे [२-१-३८ का०] । टौस्येत् [सि० १-४-१९] C.।
२. आपो ङितां यै-यास्-यास्-याम् [सि० १-४-१७] A.।
ङवन्ति [यै यास् यास् याम् २-१-४२ का०] A.।
३. टौसोरे [२-१-३८ का०] A.।
४. ह्रस्वाऽऽपश्च [सि० १-४-३२] आम् नाम् A.। पा० श्रद्धाणाम् A.B.।
५. हैम-एदापः [१-४-४२] इणइ सू० आकारान्तस्त्रीलिङ्गशब्दरहइं आमं० आकार ए A.।
ह्रस्वनदीश्रद्धाभ्यः सिर्लोपम् [२-१-७१ का०], संबुद्धौ च [२-१-३९ का०] एकार A.।
६. पा० श्रद्धामालादयः C.।
७. पा० धूलि-श्रेणिनिःश्रेणिवेणयः C.।
८. पा० भूमिपाल्याली-दिवि० C.।
९. पा० छविकृषिः A.B.।
१०. पा० शृणिरस्त्रिः A.B.।
११. पा० राटिर्धृति० A.B.।
१२. पा० दालिः पङ्क्ति च A.B.।
१३. पा० गतिधृति० C.।
१४. पा० धुटिस्त्रुटिः A.B.।
१५. पा० ऋद्धिवृद्धिः C.।
१६. पा० घृष्टिसङ्गतिः C.।
१७. इदुतोऽस्त्रेरीदूत् [सि० १-४-२१] ई A.। औकारः पूर्वम् [२-१-५१ का०] A.।
१८. जस्येदोत् [सि० १-४-२२] इकार एकार A.। इरेदुरोज्जसि [२-१-५५ का०] A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| बुद्धिम् | बुद्धी | बुद्धीः |
| बुद्ध्या | बुद्धिभ्याम् | बुद्धिभिः |
| [1]बुद्ध्यै, बुद्धये | बुद्धिभ्याम् | बुद्धिभ्यः |
| बुद्ध्याः, बुद्धेः | बुद्धिभ्याम् | बुद्धिभ्यः |
| बुद्ध्याः, बुद्धेः | बुद्ध्योः | बुद्धीनाम् |
| बुद्ध्याम्, बुद्धौ[2] | बुद्ध्योः | बुद्धिषु |
| [3]सं० हे बुद्धे | हे बुद्धी | हे बुद्धयः |

एवं शक्त्यादयोऽपि ।

अथ ईकारान्ताः ।

नदी नारी सखी नी[4]ली कद[5]ली लवली मही ।
[6]भषी प्लवी कुमारी च नलिनी बि[7]सिनी वनी ॥१॥
भामिनी कामिनी सौमी [8]मशी रीरी [9]पुरन्ध्र्यपि ।
वाणिनी मालिनी शूद्री हिमानी सरसी तथा ॥२॥
मातुलानी क्षत्रियाणी ब्राह्मणी सुन्दरी गौरी ।
उपाध्यायी [10]शालिपर्णी मृडानी पार्वती कनी ॥३॥
[11]कादम्बिनी शमी काली मघोनी योगिनी तथा ।
विदुषी पेचुषी योक्ष्मी ईदन्ताः कीर्तिताः स्त्रियाम् ॥४॥

| | | |
|---|---|---|
| [12]नदी | नद्यौ | नद्यः |
| नदीम् | नद्यौ | नदीः |
| नद्या | नदीभ्याम् | नदीभिः |

१. स्त्रिया ङित्तां वा दै-दास्-दास्-दाम् [सि० १-४-२८] A.। ह्रस्वश्च ङवति [२-२-५ का०] नदीवद्भावात्, नद्या ऐ आस् आस् आम् [२-१-४५ का०] A.। ङवन्ति [यै यास् यास् याम् २-१-४२ का०] A.।

२. ङिरौ सपूर्वः [२-१-६० का०] A.।

३. संबुद्धौ च [२-१-५६ का०] A.।

४. पा० प्लवी A.B.।

५. पा० नली कदली लवली A.B.।

६. पा० मही भषी A.B.।

७. पा० बिशिनी A.B., बिशनी C.।

८. पा० मसी A.।

९. पा० पुरन्दरी A.B.।

१०. पा० शालपर्णी A.B.।

११. एषः श्लोको नास्ति C.।

१२. दीर्घङ्याब् [व्यञ्जनात् सेः, सि० १-४-४५] A.।
ईकारान्तात् सिः [२-१-४८ का०] सि लोपम् A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| [1]नद्यै | नदीभ्याम् | नदीभ्यः |
| नद्याः | नदीभ्याम् | नदीभ्यः |
| नद्याः | नद्योः | नदीनाम् |
| नद्याम् | नद्योः | नदीषु |
| [2]सं०हे नदि | हे नद्यौ | हे नद्यः |

एवं नारीमुख्याः ।

अथ उकारान्ताः ।

धेनुस्तनुरुडुःस्नायुः [3]सरयुर्दद्रुरित्यपि ।
[5]कर्णाम्बुः स्वम्बुरज्जू च उदन्ताः कथिताः स्त्रियाम् ।

| | | |
|---|---|---|
| धेनुः | [6]धेनू | [7]धेनवः |
| धेनुम् | धेनू | धेनूः |
| [8]धेन्वा | धेनुभ्याम् | धेनुभिः |
| [9]धेन्वै, धेनवे | धेनुभ्याम् | धेनुभ्यः |
| धेन्वाः, धेनोः | धेनुभ्याम् | धेनुभ्यः |
| धेन्वाः, धेनोः | [10]धेन्वोः | धेनूनाम् |
| धेन्वाम्, धेनौ | धेन्वोः | धेनुषु |
| सं०हे धेनो | हे धेनू | हे धेनवः |

एवं तनुप्रभृतयः ।

---

१. नद्या ऐ आस् आस् आम् [२-१-४५ का०] A.।
२. ह्रस्वनदीश्रद्धाभ्यः सिर्लोपम् [२-१-७१ का०], संबुद्धौ ह्रस्वः [२-१-४६ का०] A.।
३. पा० सरसु० C.।
४. दर्दु० A.। ददु० B.।
५. कर्णाम्बुश्वम्बु० A.B.। कर्णाम्बुस्वम्बु० C.।
६. औकारः पूर्वम् [२-१-५१ का०] A.।
७. उ ओत् A.।
८. वमुवर्णः [१-२-९ का०] A.।
९. ह्रस्वश्च ङवति [२-२-५ का०] नदीवद्भावात्, नद्या ऐ आस् आस् आम् [२-१-४५ का०] ऐ आस् आस् आम् आदेशः A.।
१०. वमुवर्णः [१-२-९ का०] A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ ऊकारान्ताः ।

वधूर्दम्भूर्श्भूः[1] श्वस्रू-[2]रैलाबूर्दधिषूः कुहूः ।
कपिकच्छूः कसेरूश्च वामोरूः सरयूरपि ॥१॥
[3]कद्रूः कण्डूः करभोरूः कर्कन्धूश्च कमण्डलूः ।
संहितोरूः सहितोरूः सफोरूः कथिताः स्त्रियाम् ॥२॥

| | | |
|---|---|---|
| वधूः | वध्वौ | वध्वः |
| [4]वधूम् | वध्वौ | वधूः |
| वध्वा | वधूभ्याम् | वधूभिः |
| [5]वध्वै | वधूभ्याम् | वधूभ्यः |
| वध्वाः | वधूभ्याम् | वधूभ्यः |
| वध्वाः | वध्वोः | वधूनाम् |
| वध्वाम् | वध्वोः | वधूषु |
| सं०हे वधु | हे वध्वौ | हे वध्वः |

एवं दम्भूप्रभृतयः ।

अथ ऋकारान्ताः ।

[6]माता पितृष्वसा याता दुहिता मातृष्वसा तथा ।
ननान्दा च स्वसा प्राज्ञैः शब्दाः प्रोक्ता ह्यमी ऋताः ॥१॥

| | | |
|---|---|---|
| [7]माता | [8]मातरौ | मातरः |
| मातरम् | मातरौ | [9]मातॄः |

१. पा० शुमूः स्वसू० A.B.।
२. पा० ०दलाबूः दधिषूः कहूः A.B., ०रलाबूद० C.।
३. कण्डूः करभोरूः कर्कन्धूश्च कमण्डलूः ।
सहितोरूः संहितोरूः सिंहितोरूः सिफोरूः कथिता स्त्रियाम् ॥ A.B.।
कण्डू कण्डू करभोरू कर्कन्धू च कमण्डलू ।
संहितोरू सहितोरू शिफरू० C.।
४. समानादमोऽतः [सि० १-४-४६] अकारलोप A.।
५. नद्या ऐ आस् आस् आम् [२-१-४५ का०] ऐ, आस्, आस्, आम् आदेशः A.।
६. मातृपि० A.B.।
७. ऋदुशनस्-पुरुदंशो ऽनेहसश्च सेर्डाः [सि० १-४-८४] सि डा, डित्यन्त्यस्वरादे [सि० २-१-११४] A.।
८. अर्डौ च [सि० १-४-३९] अर् A.। ९. शसोऽता० [सि० १-४-४९] A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| [1]मात्रा | मातृभ्याम् | मातृभिः |
| मात्रे | मातृभ्याम् | मातृभ्यः |
| [2]मातुः | मातृभ्याम् | मातृभ्यः |
| मातुः | मात्रोः | [3]मातृणाम् |
| [4]मातरि | मात्रोः | मातृषु |
| सं०हे मातः | हे मातरौ | हे मातरः |

एवं यातृ-दुहितृ-ननान्दरः ।

| | | |
|---|---|---|
| स्वसा | [5]स्वसारौ | स्वसारः |
| स्वसारम् | स्वसारौ | स्वसॄः |
| [6]स्वस्रा | स्वसृभ्याम् | स्वसृभिः |
| स्वस्रे | स्वसृभ्याम् | स्वसृभ्यः |
| [7]स्वसुः | स्वसृभ्याम् | स्वसृभ्यः |
| स्वसुः | स्वस्रोः | स्वसृणाम् |
| स्वसरि | स्वस्रोः | स्वसृषु |
| सं०हे स्वसः | हे स्वसारौ | हे स्वसारः |

एवं पितृष्वसृ-मातृष्वसृशब्दाः ।

अथ ओकारान्ताः

| | | |
|---|---|---|
| [8]द्यौः | द्यावौ | द्यावः |
| [9]द्याम् | द्यावौ | [10]द्याः |

---

१. रमृवर्णः [१-२-१० का०] A.B.।

२. ऋतो डुर् [सि० १-४-३७] A.। ऋदन्तात् सपूर्वः [२-१-६३ का०] A.।

३. आम् नाम्, दीर्घो नाम्य [तिसृ-चतसृ-प्रः [सि० १-४-४७] A.।

४. अर्डौ [२-१-६६ का०] A.।

५. तृ-स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-[पोतृ-प्रशास्त्रो घुट्यार्, सि० १-४-३८] इणइ ऋतो आर् A.। स्वस्रादीनां च [२-१-६९ का०] इत्यार् आदेशे A.B.।
तृ-स्वसृ० इत्यार्-स्वसा, स्वसारौ, स्वसारः, स्वसारम्, स्वसारौ शेषं मातृवत् C.।

६. रमृवर्णः [१-२-१० का०] A.।    ७. ऋतो डुर् [सि० १-४-३७] A.।

८. द्यौ शब्दो गोशब्द-ओकारान्तोपलक्षणम् । तेन द्योशब्देऽपि गौरो घुटि [२-२-३३ का०], इत्यादिनि सूत्राणि प्रवर्तन्ते A.B.। अथ ओकारान्ताः शब्दाः गोशब्दवत्; प्रथमायाः सर्वाणि द्वितीयाया एकवचनस्य रूपाणि सन्ति C.।

९. आ अम्-शसोऽता [सि० १-४-७५] ईणइ आकार A.।    १०. पा० द्यावः B.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| द्यवा | द्योभ्याम् | द्योभिः |
| द्यवे | द्योभ्याम् | द्योभ्यः |
| द्योः | द्योभ्याम् | द्योभ्यः |
| द्योः | द्यवोः | द्यवाम् |
| द्यवि | द्यवोः | द्योषु |
| सं० हे द्यौः | हे द्यावौ | हे द्यावः |

अथ औकारान्ताः ।

| | | |
|---|---|---|
| [1]नौः | नावौ | नावः |
| नावम् | नावौ | नावः |
| नावा | नौभ्याम् | नौभिः |
| नावे | नौभ्याम् | नौभ्यः |
| नावः | नौभ्याम् | नौभ्यः |
| नावः | नावोः | नावाम् |
| नावि | नावोः | नौषु |
| सं०हे नौः | हे नावौ | हे नावः |

[2]एवं स्वरान्ताः स्त्रीलिङ्गाः शब्दाः समाप्ताः ।

★ ★ ★

[अथ नपुंसकाः स्वरान्ताः शब्दाः कथ्यन्ते ।]

वनाद्या वारिमुख्याश्च जत्वाद्याः [3]स्युर्नपुंसकाः ।
ह्रस्वान्ताः कथिताः शब्दा न दीर्घान्ता भवन्ति हि ॥१॥

अथ प्रथममकारान्ताः ।

वनं सौधं किरीटं च धान्यं कुण्डं घृतं तृणम् ।
ऋणं शृङ्गं बलं पद्मं सत्यं [4]षण्ढे प्रकीर्तिताः ॥१॥

---

१. प्रथमाया द्वितीयायाश्च सर्वाणि तथा तृतीयाया एकवचनस्य रूपाणि सन्ति, ग्लौवत् A.B.।
२. पा० एवं स्वरान्ताः स्त्रियाम् C.। ३. पा० किल A.B.।
४. पा० खंढे A.B., C. ष(षं)ढे , नपुंसके [इत्यर्थः] A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| [१]वनम् | [२]वने | [३]वनानि |
| वनम् | वने | वनानि |
| [४]वनेन० | | शेषं पुंलिङ्गे वृक्षवत् । |

एवं सौधादयः ।

अथ इकारान्ताः ।

[५]वार्यस्थिदधिस[६]क्थीनि सुपथिसु[७]सखी तथा ।
अक्षिप्रभृतयः शब्दा इति [८]षण्ढे निवेदिताः ॥१॥

| | | |
|---|---|---|
| वारि | [९]वारिणी | वारीणि |
| वारि | वारिणी | वारीणि |
| वारिणा | वारिभ्याम् | वारिभिः |
| वारिणे | वारिभ्याम् | वारिभ्यः |
| वारिणः | वारिभ्याम् | वारिभ्यः |
| वारिणः | वारिणोः | वारीणाम् |
| वारिणि | वारिणोः | वारिषु |
| [१०]सं० हे वारे,वारि | हे वारिणी | हे वारीणि |

[११]एवं सुपथि-सुसखी ।

| | | |
|---|---|---|
| अस्थि | अस्थिनी | अस्थीनि |
| अस्थि | अस्थिनी | अस्थीनि |
| [१२]अस्थ्ना | अस्थिभ्याम् | अस्थिभिः |

---

१. अकारादसंबुद्धौ मुश्च [२-२-७ का०] स्यम्लोपे मुरागम A.।

२. औरीम् [२-२-२९ का०] A.।

३. जस्शसोः शिः [२-२-१० का०] जस्स्थाने इ, धुट्स्वराद् घुटि नुः [२-२-११ का०], घुटि चाऽसंबुद्धौ [२-२-१७ का०] A.।

४. A.B. प्रतौ नास्ति । ५. पा० वर्य० C.।

६. पा० सक्तीनि A.B.। ७. पा० सुसुखी A.B.।

८. पा० खण्ढे A.B.।

९. औरीम् [२-२-९ का०] औ ई, नामिनः स्वरे [२-२-१२ का०] नुरागमः A.।

१०. नामिनो लुग्वा [सि० १-४-६१] । ११. पा० सुसखि-सुपथी C.।

१२. अस्थिदधिसक्थ्यमन्नतष्टादौ [२-२-१३ का०] इति अनादेशे A.B., अस्थिदधिसक्थ्यक्ष्णा० [२-२-१३ का०] अन्तस्य अन् A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| अस्थ्ने | अस्थिभ्याम् | अस्थिभ्यः |
| अस्थ्नः | अस्थिभ्याम् | अस्थिभ्यः |
| अस्थ्नः | अस्थ्नोः | अस्थ्नाम् |
| अस्थ्नि, अस्थिनि | अस्थ्नोः | अस्थिषु |
| सं०हे अस्थि,अस्थे | हे अस्थिनी | हे अस्थीनि |

एवं दध्यादयः त्रयः ।

अथ उकारान्ताः ।

जत्वम्बुमधुवस्तूनि [१]जानुमस्त्रुत्रपूणि च ।
अश्रुश्मश्रुकसेरूणि जतु[तु]म्बुरु षण्ढके(?) ॥१॥

| | | |
|---|---|---|
| जतु | [३]जतुनी | जतूनि |
| जतु | जतुनी | जतूनि |
| जतुना | जतुभ्याम् | जतुभिः |
| जतुने | जतुभ्याम् | जतुभ्यः |
| जतुनः | जतुभ्याम् | जतुभ्यः |
| जतुनः | जतुनोः | जतूनाम् |
| जतुनि | जतुनोः | जतुषु |
| सं०हे जतो,जतु | हे जतुनी | हे जतूनि |

एवमम्बुप्रभृतयः । इति स्वरान्ताः शब्दा नपुंसकाः ।

★

## अथ व्यञ्जनान्ताः प्रारभ्यन्ते ।

तत्र प्रथमं पुंलिङ्गाः ।

[४]चित्रलिखम्बुमुक् शब्द-प्राट् [५]भूभुक्सुर्गणौ तथा ।
मरुच्च बलिभिद् ज्ञान-भुद् [७]राजविदभौ तथा ॥१॥

विडुशनसौ मधुलिट् दामलिट् [८]काष्ठतट् तथा ।
व्यञ्जनान्ताः स्मृताः पुंसि बालव्युत्पत्तिहेतवे ॥२॥

---

१. पा० वावु A.B.। २. पा० स्मश्रु A.B.C.।
३. अनामृस्वरे नोऽन्तः [सि० १-४-६४] A.। ४. पा० चित्रलिड्गम्बुमुक् A.B.C.।
५. पा० भूभृक् A.B.। ६. पा० सगुणौ A.B.।
७. पा० राजविदुभौ C.। ८. पा० काष्टतट् A.B.C.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ खान्तः ।

| | | |
|---|---|---|
| [1]चित्रलिक्, चित्रलिग् | चित्रलिखौ | चित्रलिखः |
| चित्रलिखम् | चित्रलिखौ | चित्रलिखः |
| चित्रलिखा | चित्रलिग्भ्याम् | चित्रलिग्भिः |
| चित्रलिखे | चित्रलिग्भ्याम् | चित्रलिग्भ्यः |
| चित्रलिखः | चित्रलिग्भ्याम् | चित्रलिग्भ्यः |
| चित्रलिखः | चित्रलिखोः | चित्रलिखाम् |
| चित्रलिखि | चित्रलिखोः | चित्रलिक्षु |
| सं०हे चित्रलिक्,चित्रलिग् | हे चित्रलिखौ | हे चित्रलिखः |

अथ चान्तः ।

| | | |
|---|---|---|
| अम्बुमुक्,अम्बुमुग्[2] | अम्बुमुचौ | अम्बुमुचः |
| अम्बुमुचम् | अम्बुमुचौ | अम्बुमुचः |
| अम्बुमुचा | अम्बुमुग्भ्याम् | अम्बुमुग्भिः |
| अम्बुमुचे | अम्बुमुग्भ्याम् | अम्बुमुग्भ्यः |
| अम्बुमुचः | अम्बुमुग्भ्याम् | अम्बुमुग्भ्यः |
| अम्बुमुचः | अम्बुमुचोः | अम्बुमुचाम् |
| अम्बुमुचि | अम्बुमुचोः | अम्बुमुक्षु |
| सं०हे अम्बुमुक्,अम्बुमुग् | हे अम्बुमुचौ | हे अम्बुमुचः |

एवं पयोमुच् ।

क्रुञ्च्शब्दः ।

| | | |
|---|---|---|
| [3]क्रुङ् | क्रुञ्चौ | क्रुञ्चः |

सप्तम्यां तु क्रुङ्क्षु, क्रुङ्सु

अथ छान्तः ।

| | | |
|---|---|---|
| [4]शब्दप्राड्, शब्दप्रात् | शब्दप्राछौ | शब्दप्राछः |

१. अघोषे प्रथमोऽशिटः [सि० १-३-५०] ख् क् A.।

२. चजः कगम् [सि० २-१-८६] चकार क्, विरामे वा [सि० १-३-५१] A.। प्रथमायाः द्वितीयायाश्च सर्वाणि, तृतीयायाः एकद्विवचनयोस्तथा सप्तम्याः बहुवचनस्य सन्ति C.।

३. युजञ्चक्रुञ्चो नो ङः [सि० २-१-७१] A.।

४. यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रश्च-परिव्राजः शः षः [सि० २-१-८७] छ् ष्, । हशषछान्तेजादीनां डः [२-३-४६ का०] छ् ड्, वा विरामे [२-३-६२ का०] डस्य ट् A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| शब्दप्राछम् | शब्दप्राछौ | शब्दप्राछः |
| शब्दप्राछा | शब्दप्राड्भ्याम् | शब्दप्राड्भिः |
| शब्दप्राछे | शब्दप्राड्भ्याम् | शब्दप्राड्भ्यः |
| शब्दप्राछः | शब्दप्राड्भ्याम् | शब्दप्राड्भ्यः |
| शब्दप्राछः | शब्दप्राछोः | शब्दप्राछाम् |
| शब्दप्राछि | शब्दप्राछोः | शब्दप्राड्सु |
| सं०हे शब्दप्राड्,शब्दप्राट् | हे शब्दप्राछौ | हे शब्दप्राछः |

[1]एवं पथिप्राछ्प्रभृतयः ।

अथ जान्तः ।

| | | |
|---|---|---|
| [2]भूभुक्, भूभुग् | भूभुजौ | भूभुजः |
| भूभुजम् | भूभुजौ | भूभुजः |
| भूभुजा | भूभुग्भ्याम् | भूभुग्भिः |
| भूभुजे | भूभुग्भ्याम् | भूभुग्भ्यः |
| भूभुजः | भूभुग्भ्याम् | भूभुग्भ्यः |
| भूभुजः | भूभुजोः | भूभुजाम् |
| भूभुजि | भूभुजोः | भूभुक्षु |
| सं०हे भूभुग्,भूभुक् | हे भूभुजौ | हे भूभुजः |

एवं हुतभुज्, बलिभुज्, वणिज्, भिषज्, परिव्राज्, देवेज्, रज्जुसृज्, कंसपरिमृज्, धानाभृज्ज्[3], [4]मूलवृश्च्, [5]बि(वि)भ्राज्, [6]सम्राज्प्रभृतयः ।

अत णान्तः ।

| | | |
|---|---|---|
| [7]सुगण् | सुगणौ | सुगणः |
| सुगणम् | सुगणौ | सुगणः |

१. पा० एवं पथिप्राछः A.B.।

२. प्रथमायाः द्वितीयायाश्च सर्वाणि, तृतीयायाः एकद्विवचनयोस्तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति । C.।

३. पा० धानाभृज् A.B. धानाभृट् C.।  ४. पा० मूलवृज् A.B. मूलवृट् C.।

५.६. एतौ द्वौ शब्दो न स्तः A.B.।

७. प्रथमायाः सर्वाणि, द्वितीयायाः एकवचनयोः, तृतीयायाः द्विवचनस्य तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति C.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| सुगणा | सुगण्भ्याम् | सुगण्भिः |
| सुगणे | सुगण्भ्याम् | सुगण्भ्यः |
| सुगणः | सुगण्भ्याम् | सुगण्भ्यः |
| सुगणः | सुगणोः | सुगणाम् |
| सुगणि | सुगणोः | [1]सुगण्सु |
| सं०हे सुगण् | हे सुगणौ | हे सुगणः |

एवमन्येऽपि णान्ताः ।

अथ तान्तः ।

| | | |
|---|---|---|
| मरुत्, मरुद्[2] | मरुतौ | मरुतः |
| मरुतम् | मरुतौ | मरुतः |
| मरुता | मरुद्भ्याम् | मरुदिभः |
| मरुते | मरुद्भ्याम् | मरुद्भ्यः |
| मरुतः | मरुद्भ्याम् | मरुद्भ्यः |
| मरुतः | मरुतोः | मरुताम् |
| मरुति | मरुतोः | ३मरुत्सु |
| सं० हे मरुत्, मरद् | हे मरुतौ | हे मरुतः |

एवं गरुत्, हरित्, अग्निचित्, विपश्चित्, [4]सामसुत्प्रभृतयः ।

अथ दान्तः ।

| | | |
|---|---|---|
| [5]बलिभित्, बलिभिद् | बलिभिदौ | बलिभिदः |
| बलिभिदम् | बलिभिदौ | बलिभिदः |
| बलिभिदा | बलिभिद्भ्याम् | बलिभिद्भिः |
| बलिभिदे | बलिभिद्भ्याम् | बलिभिद्भ्यः |
| बलिभिदः | बलिभिद्भ्याम् | बलिभिद्भ्यः |

---

१. पा० सुगण्ट्सु, ङ्णोः कटावन्तौ शिटि नवा [सि० १-३-१७] C.।

२. धुटां तृतीयः [२-३-६० का०] तस्य द, वा विरामे [२-३-६२ का०] द् त् A.। प्रथमायाः द्वितीयायाश्च सर्वाणि, तृतीयायाः एकद्विवचनयोस्तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति C. ।

३. मरुत्सु, मरुथ्सु, शिट्याद्यस्य द्वितीयो वा [सि० १-३-५९] C. ।

४. पा० सोमसुत् A.B. ।

५. प्रथमायाः सर्वाणि, द्वितीयायाः एकवचनस्य, तृतीयायाः द्विवचनस्य तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति C. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| बलिभिदः | बलिभिदोः | बलिभिदाम् |
| बलिभिदि | बलिभिदोः | बलिभित्सु |
| सं० हे बलिभित्,बलिभिद् | हे बलिभिदौ | हे बलिभिदः |

एवं विविषद्, द्युसद्, सभासद्, सुहृद्, सर्वविद्, वेदविद्, ज्ञानवित्प्रभृतयः ।

अथ धान्तः ।

| | | |
|---|---|---|
| [1]ज्ञानभुत्, ज्ञानभुद् | ज्ञानबुधौ | ज्ञानबुधः |
| ज्ञानबुधम् | ज्ञानबुधौ | ज्ञानबुधः |
| ज्ञानबुधा | ज्ञानभुद्भ्याम् | ज्ञानभुद्भिः |
| ज्ञानबुधे | ज्ञानभुद्भ्याम् | ज्ञानभुद्भ्यः |
| ज्ञानबुधः | ज्ञानभुद्भ्याम् | ज्ञानभुद्भ्यः |
| ज्ञानबुधः | ज्ञानबुधोः | ज्ञानबुधाम् |
| ज्ञानबुधि | ज्ञानबुधोः | ज्ञानभुत्सु |
| सं०हे ज्ञानभुत्,ज्ञानभुद् | हे ज्ञानबुधौ | हे ज्ञानबुधः |

[2]एवं-

| | | |
|---|---|---|
| [3]विक्रुत्, विक्रुद् | विक्रुधौ | विक्रुधः |
| विक्रुधम् | विक्रुधौ | विक्रुधः |
| विक्रुधा | विक्रुद्भ्याम् | विक्रुद्भिः |
| विक्रुधे | विक्रुद्भ्याम् | विक्रुद्भ्यः |
| विक्रुधः | विक्रुद्भ्याम् | विक्रुद्भ्यः |
| विक्रुधः | विक्रुधोः | विक्रुधाम् |
| विक्रुधि | विक्रुधोः | विक्रुत्सु |
| सं०हे विक्रुत्, विक्रुद् | हे विक्रुधौ | हे विक्रुधः |

---

१. ईणइं सूत्रिइं गडदबादेश्चतुर्थान्तस्यैकस्वरस्याऽऽदेश्चतुर्थः [स्ध्वोश्च प्रत्यये सि० २-१-७७] बकार भ् A.। हचतुर्थान्तस्य धातोस्तृतीयादेरादि [चतुर्थत्वमकृतवत् २-३-५० का०] A.। प्रथमायाः द्वितीयायाश्च सर्वाणि तृतीयायाः एकद्विवचनयोस्तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति C.।

२. पा० तथाऽपि A.B.।

३. धुटां तृतीयः [२-३-६० का०] ईणइं सूत्रिइं ध् द्, वा विरामे [२-३-६२ का०] द् त् A.। प्रथमायाः सर्वाणि तथा द्वितीयायाः एकवचनस्य रूपाणि सन्ति C.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं क्रुध्, मर्माविध्, [१]मृगाविध्, [२]श्वाविध्प्रभृतयः ।

अथ नान्तः ।

| | | |
|---|---|---|
| [३]राजा | राजानौ | राजानः |
| राजानम् | राजानौ | [४]राज्ञः |
| राज्ञा | [५]राजभ्याम् | राजभिः |
| राज्ञे | राजभ्याम् | राजभ्यः |
| राज्ञः | राजभ्याम् | राजभ्यः |
| राज्ञः | राज्ञोः | राज्ञाम् |
| [६]राज्ञि, राजनि | राज्ञोः | राजसु |
| [७]सं०हे राजन् | हे राजानौ | हे राजानः |

एवं तक्षन्, उक्षन्, [८]प्रतिदिवन्, प्रथिमन्, [९]मदिमन्, [१०]तुशिमन्, [११]भूशिमन्, अणिमन्, महिमन्, लघिमन्, गरिमन्, [१२]क्रशिमन् [१३]प्रशमिन् प्रभृतयः ।

तथा–

| | | |
|---|---|---|
| श्वा[१४] | श्वानौ | श्वानः |
| श्वानम् | श्वानौ | [१५]शुनः |
| शुना | श्वभ्याम् | श्वभिः |
| शुने | श्वभ्याम् | श्वभ्यः |
| शुनः | श्वभ्याम् | श्वभ्यः |

१. पा० मृगविध् C.।  २. A.B. प्रतौ नास्ति ।

३. नि दीर्घः [सि० १-४-८५] ईणइं सूत्रिइं दीर्घ A.। घुटि चासंबुद्धौ [२-२-१७ का०] दीर्घ A.।

४. अवमसंयोगादनोऽलोपोऽलुप्तवच्च पूर्वविधौ [२-२-५३ का०] A.।

५. नसंयोगान्तावलुप्तवच्च पूर्वविधौ [२-३-५८ का०] A.।

६. ईड्योर्वा [२-२-५४ का०] A.।  ७. न संबुद्धौ [२-३-५७ का०] A.।

८. पा० प्रतिदीवन् A.B.।  ९. पा० मृदिमन् A.B.।

१०-११. C. प्रतौ नास्ति ।  १२-१३. A.B. प्रतौ नास्ति ।

१४. घुटि चाऽसंबुद्धौ [२-२-१७ का०] दीर्घ A. ।

१५. श्वयुवमघोना च [२-२-४७ का०] एह शब्दइं ईणए वकारनइं उकार हुइं A.। श्वन्-युवन् मघोनो डी-स्याद्यघुट्स्वरे व उः [सि० २-१-१०६] C.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| शुनः | शुनोः | शुनाम् |
| शुनि | शुनोः | श्वसु |
| सं०हे श्वन् | हे श्वानौ | हे श्वानः |

शुनीशब्दो नदीवत् ।

युवन्शब्दः श्वन्वत् । स्त्रियां तु 'यूनस्तिः' इति 'ति' प्रत्यये युवतिर्बुद्धिवत् ।[1]

[2]मघवन्शब्दः श्वन्वत् । पक्षे सौ च मघवान् मघवा वा [२-२-२३ का०] इति मघवन्त्-आदेशे कृते-

| | | |
|---|---|---|
| [3]मघवान् | मघवन्तौ | मघवन्तः |
| मघवन्तम् | मघवन्तौ | मघवतः |
| मघवता | मघवद्भ्याम् | मघवदिभः |
| मघवते | मघवद्भ्याम् | मघवद्भ्यः |
| मघवतः | मघवद्भ्याम् | मघवद्भ्यः |
| मघवतः | मघवतोः | मघवताम् |
| मघवति | मघवतोः | मघवत्सु |
| सं० हे मघवन् | हे मघवन्तौ | हे मघवन्तः |
| [4]मघवा | मघवानौ | मघवानः |
| मघवानम् | मघवानौ | मघोनः |
| मघोना | मघवभ्याम् | मघवभिः |
| मघोने | मघवभ्याम् | मघवभ्यः |
| मघोनः | मघवभ्याम् | मघवभ्यः |
| मघोनः | मघोनोः | मघोनाम् |
| मघोनि | मघोनोः | मघवत्सु |

१. पा० स्त्रियां यूनस्तिः प्रत्यये युवति बुद्धिवत् A.B.।

२. C. प्रतौ 'मघवन्.... कृते' एषः पाठो नास्ति ।

३. अभ्वादेरत्वसः सौ [सि० १-४-९०] A. । अन्त्वसन्तस्य चाधातोः सौ [२-२-२० का०] सौ दीर्घ A । प्रथमायाः द्वितीयायाश्च सर्वाणि, तृतीयायाः एक द्विवचनयोस्तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति C.।

४. A.B. प्रतौ एतानि सर्वाणि रूपाणि न सन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| सं०हे मघवन् | हे मघवानौ | हे मघवान: |

एवं भवन्त्-भगवन्त्-[1]महन्त्-अघवन्त्-गोमन्त्[2]-विद्युत्वन्त्-लक्ष्मीवन्त्-[3]अर्थवन्त् शब्दा मघवन्त्वत्[4] ।

स्त्रियां तु मघोनी मघवती । सर्वेऽपि सम्भवत[5] ईप्रत्ययान्ता नदीवत् ।

तथा-

| | | |
|---|---|---|
| [7]दण्डी | दण्डिनौ | दण्डिन: |
| दण्डिनम् | दण्डिनौ | दण्डिन: |
| दण्डिना | दण्डिभ्याम् | दण्डिभि: |
| दण्डिने | दण्डिभ्याम् | दण्डिभ्य: |
| दण्डिन: | दण्डिभ्याम् | दण्डिभ्य: |
| दण्डिन: | दण्डिनो: | दण्डिनाम् |
| दण्डिनि | दण्डिनो: | दण्डिषु |
| सं० हे दण्डिन् | हे दण्डिनौ | हे दण्डिन: |

एवं मायिन्-मायाविन्-मनस्विन्-मनीषिन्-[8]गुणिन्-[9]वचस्विन्शब्दा [10]दण्डिन्वत् ।

तथा-

| | | |
|---|---|---|
| [11]वृत्रहा | वृत्रहणौ | वृत्रहण: |
| वृत्रहणम् | वृत्रहणौ | [12]वृत्रघ्न: |
| वृत्रघ्ना | वृत्रहभ्याम् | वृत्रहभि: |
| वृत्रघ्ने | वृत्रहभ्याम् | वृत्रहभ्य: |

---

१.२.४ C. प्रतौ नास्ति ।     ३. A.B. प्रतौ नास्ति ।

५. श्वन्-युवन्-मघोनो ङी-स्याद्यधुट्स्वरे वउः [सि० २-१-१०६] A.।

६. C. प्रतौ नास्ति ।

७. इन्-हन्-पूषाऽर्यम्णः शिस्योः [सि० १-४-८७] दीर्घ A.।

८.९. A.B. प्रतौ नास्ति ।     १०. C. प्रतौ नास्ति ।

११. इन्हन् [पूषार्यम्णां शौ च २-२-२१ का०] A.B.। इन्-हन्-पूषाऽर्यम्णः शिस्योः [सि० १-४-८७] अनेन C., C. प्रतौ प्रथमायाः द्वितीयाया एव रूपाणि सन्ति ।

१२. अनोऽस्य [सि० २-१-१०८] अकार लोप, हनो ह्नो घ्न् [सि० २-१-११२] हन्स्थाने घ्न A. । अवमसंयोगाद [नोऽलोपोऽलुप्तवच्च पूर्वविधौ २-२-५३ का०] इति अकार लोपे 'हनेर्हैर्धिरुपधालोपे [२-२-३२ का०] A. ।

Jain Education International     For Private & Personal Use Only     www.jainelibrary.org

| | | |
|---|---|---|
| वृत्रघ्नः | वृत्रहभ्याम् | वृत्रहभ्यः |
| वृत्रघ्नः | वृत्रघ्नोः | वृत्रघ्नाम् |
| वृत्रघ्नि | वृत्रघ्नोः | वृत्रहसु |
| सं०हे वृत्रहन् | हे वृत्रहणौ | हे वृत्रहणः |

एवं [1]भ्रूहन्-मित्रहन्-रिपुहन्-भ्रूणहन्[2]-ब्रह्म[3]हन्प्रभृतयः ।

अहि वहि प्लहि गतौ, प्लिह प्लिहात् प्लीहा प्लिहेरिन्दीर्घश्च अन् दीर्घत्वे प्लीहन् निष्पन्नं पश्चात् हनेर्हेष्वकारो भवति ।

| | | |
|---|---|---|
| प्लीहा | प्लीहानौ | प्लीहानः |
| प्लीहानम् | प्लीहानौ | प्लीह्नः |
| प्लीह्ना | [4]प्लीहभ्याम्० इत्यादि । | |

तथा-

| | | |
|---|---|---|
| [5]पूषा | पूषणौ | पूषणः |
| पूषणम् | पूषणौ | [6]पूष्णः |
| पूष्णा | पूषभ्याम् | पूषभिः |
| पूष्णे | पूषभ्याम् | पूषभ्यः |
| पूष्णः | पूषभ्याम् | पूषभ्यः |
| पूष्णः | पूष्णोः | पूष्णाम् |
| पूष्णि, [7]पूषणि | पूष्णोः | पूषसु |
| सं०हे पूषन् | हे पूषणौ | हे पूषणः |

एवमर्यमन्-[8]सूर्यमन् ।

धु[9]टां प्राग्नोन्त् आदेशे-

| | | |
|---|---|---|
| [10]अर्वा | [11]अर्वन्तौ | अर्वन्तः |

१. C. प्रतौ नास्ति । २-३. A.B. प्रतौ नास्ति ।

४. एतद् रूपं नास्ति C.।

५. इनहन्पूषार्यम्णां शौ च [२-२-२१ का०] दीर्घ A.B., इन्-हन्-पूषार्यम्णः [सि० १-४-८७] एतेन C.। ६. अनोऽस्य [सि० २-१-१०८] अकार लोप A.।

७. पा० पूषनि A.B.। ८-९. C. प्रतौ एषः पाठो नास्ति ।

१०. अभ्वादेरत्वसः सौ [सि० १-४-९०] ईणइ सूत्रिइ दीर्घ A.। C. प्रतौ प्रथमायाः द्वितीयायाश्च सर्वाणि, तृतीयायाः एकद्विवचनयोस्तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति, तत्र अर्वत्सु, अर्वथ्सु-शिट्याद्यस्य द्वितीयो वा [सि० १-३-५९] ।

११. अर्वन्नर्वन्तिरसावनञ् [२-३-२२ का०] A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| अर्वन्तम् | अर्वन्तौ | अर्वतः |
| अर्वता | अर्वद्भ्याम् | अर्वद्भिः |
| अर्वते | अर्वद्भ्याम् | अर्वद्भ्यः |
| अर्वतः | अर्वद्भ्याम् | अर्वद्भ्यः |
| अर्वतः | अर्वतोः | अर्वताम् |
| अर्वति | अर्वतोः | अर्वत्सु |
| सं०हे अर्वन् | हे अर्वन्तौ | हे अर्वन्तः |

अथ भान्तः ।

| | | |
|---|---|---|
| [१]विधप्, विधब् | विदभौ | विदभः |
| विदभम् | विदभौ | विदभः |
| विदभा | विधब्भ्याम् | विधब्भिः |
| विदभे | विधब्भ्याम् | विधब्भ्यः |
| विदभः | विधब्भ्याम् | विधब्भ्यः |
| विदभः | विदभोः | विदभाम् |
| विदभि | विदभोः | विधप्सु |
| सं०हे विधप्,विधब् | हे विदभौ | हे विदभः |

एवं गर्दभप्रभृतयः ।

अथ मान्तः ।

| | | |
|---|---|---|
| [२]प्रशान् | [३]प्रशामौ | प्रशामः |
| प्रशामम् | प्रशामौ | प्रशामः |
| प्रशामा | प्रशान्भ्याम् | प्रशान्भिः |
| प्रशामे | प्रशान्भ्याम् | प्रशान्भ्यः |
| प्रशामः | प्रशान्भ्याम् | प्रशान्भ्यः |

---

१. गडदबादे [श्चतुर्थान्तस्यैकस्वरस्याऽऽदेश्चतुर्थः स्ध्वोश्च प्रत्यये सि० २-१-७७] ईणइं सूत्रिइं द् ध्, धुटस्तृतीयः [सि० २-१-७६] भ् ब्, विरामे वा [सि० १-३-५१] ब् प् A.। गडदबादेश्चतुर्थान्त० C.।

२. मो नो म्वोश्च [सि० २-१-६७] मकार नकार A.। मो नो म्वोश्च [सि० २-१-६७] C., C प्रतौ प्रथमायाः द्वितीयायाः तृतीयायाश्च सर्वाणि, चतुर्थ्याः एक द्विवचनयोस्तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

३. स्वरे धातुरन् इति मा वत्त्वम् A.B.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| प्रशामः | प्रशामोः | प्रशामाम् |
| प्रशामि | प्रशामोः | प्रशान्सु |
| सं०हे प्रशान् | हे प्रशामौ | हे प्रशामः |

अथ शान्तः ।

| | | |
|---|---|---|
| [1]विट्, विड् | विशौ | विशः |
| विशम् | विशौ | विशः |
| विशा | विड्भ्याम् | विड्भिः |
| विशे | विड्भ्याम् | विड्भ्यः |
| विशः | विड्भ्याम् | विड्भ्यः |
| विशः | विशोः | विशाम् |
| विशि | विशोः | [2]विट्सु |
| सं०हे विट्, विड् | हे विशौ | हे विशः |

एवं शब्दप्राश्-[3]पथिप्राश् ।

[4]अथ षान्तः ।

द्विट्, द्विड् द्विषौ० द्विड्भ्याम्० विट्वत् ।

अथ सान्तः ।

| | | |
|---|---|---|
| [5]उशना | उशनसौ | उशनसः |
| उशनसम् | उशनसौ | उशनसः |
| उशनसा | उशनोभ्याम् | उशनोभिः |
| उशनसे | उशनोभ्याम् | उशनोभ्यः |

---

१. यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रश्च [परिव्राजः शः षः, सि० २-१-८७] अनेन श् ष्, धुटस्तृतीयः [सि० २-१-७६] षकार ड्, वि [रामे वा सि० १-३-५१] ड् ट् A.। हशषछान्तेजादीनां डः [२-३-४६ का०] डकार, A.। C. प्रतौ प्रथमायाः द्वितीयायाश्च सर्वाणि, तृतीयायाः एकद्विवचनयोस्तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

२. विड्सु, विड्त्सु, ड्नः सः त्सोऽश्चः [सि० १-३-१८] C.।

३. C. प्रतौ नास्ति ।

४. 'अथ षान्तः द्विषः' इत्येव पाठोऽस्ति A.B.।

५. ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः [सि० १-४-८४] A.। उशनः पुरुदंशोऽनेहसां सावनन्तः [२-२-२२ का०] अन्तस्याऽन् A.। C. प्रतौ प्रथमायाः द्वितीयायाश्च सर्वाणि, तृतीयायाः एकद्विवचनयोस्तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| उशनसः | उशनोभ्याम् | उशनोभ्यः |
| उशनसः | उशनसोः | उशनसाम् |
| उशनसि | उशनसोः | उशनस्सु |
| [१]सं० हे उशनः,उशनन्,उशन | हे उशनसौ | हे उशनसः |

[२]एवं पुरुदंशस् ।

| | | |
|---|---|---|
| सं०हे पुरुदंशः | हे पुरुदंशसौ | हे पुरुदंशसः |

एवमनेहस् ।

[३]प्रचेतस्शब्दे तु सौ परे-

| | | |
|---|---|---|
| प्रचेताः | प्रचेतसौ | प्रचेतसः |
| प्रचेतसम् | प्रचेतसौ | प्रचेतसः |

प्रचेतसा० शेषं पूर्ववत् ।

एवं चन्द्रमस्-सु[४]श्रोतस्-विष्टरश्रवस्-[५]उच्चैःश्रवस्-कृत्तिवासस्-[६]जग्मिवस् ।

| | | |
|---|---|---|
| [७]जग्मिवान् | जग्मिवांसौ | जग्मिवांसः |
| जग्मिवांसम् | जग्मिवांसौ | [८]जग्मुषः |
| जग्मुषा | [९]जग्मिवद्भ्याम् | जग्मिवद्भिः |
| जग्मुषे० | जग्मिवद्भ्याम् | जग्मिवद्भ्यः |
| जग्मुष० | जग्मिवद्भ्याम् | जग्मिवद्भ्यः |
| जग्मुषः | जग्मुषोः | जग्मुषाम् |

---

१. संबोधने वोशनसो नश्चामन्त्र्ये सौ [सि० १-४-८०] इति सूत्रेण विकल्पेन सकारलोपे कृते च रूपत्रयम् A.B.। उशनः पुरुदंशोऽनेहसां सावनन्तः [२-२-२२ का०] तत्राऽनिर्दिष्टमिति न्यायात् त्रीणि रूपाणि भवन्ति A. ।

२. C. प्रतौ एतानि रूपाणि न सन्ति ।

३. पा० प्रचेतस् शब्दे तु सौ प्रचेताः शेषं पूर्ववत् C.।

४. पा० शुश्रो० C. । ५. C. प्रतौ नास्ति । ६. A.B. प्रतौ नास्ति ।

७. A.B. प्रतौ विद्वस्शब्दस्य रूपाणां पश्चाद् जग्मिवस्शब्दस्य रूपाणि सन्ति । ऋदुदितः [सि० १-४-७०] नोऽन्त, न्स्महतोः [सि० १-४-८६] दीर्घत्वम्, ततः C.।

८. क्वसुष् मतौ च [सि० २-१-१०५] उत्वम् A., अघुट्स्वरादौ सेट्कस्याऽपि वन्सेर्वशब्दस्योत्वम् [२-२-४६ का०] A.। क्वसुष् मतौ च [सि० २-१-१०५] इत्यनेन C.।

९. धुटस्तृतीयः [सि. २-१-७६] सस्य दत्वे C. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| जग्मुषि | जग्मुषोः | जग्मिवत्सु |
| सं०हे जग्मिवन् | हे जग्मिवांसौ | हे जग्मिवांसः |

[१]विकल्पेनेट्-

| | | |
|---|---|---|
| जगन्वान् | जगन्वांसौ | जगन्वांसः |
| जगन्वांसम् | जगन्वांसौ | जगमुषः |
| जगमुषा | जगमुद्भ्याम् | जगमुद्भिः |
| जगमुषे | जगमुद्भ्याम्० | |
| सं०हे जगन्वन् | हे जगन्वांसौ | हे जगन्वांसः |

एवं तस्थिवन्स् ।

| | | |
|---|---|---|
| विद्वान् | विद्वांसौ | विद्वांसः |
| विद्वांसम् | विद्वांसौ | [२]विदुषः |
| विदुषा | [३]विद्वद्भ्याम् | विद्वद्भिः |
| विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः |
| विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः |
| विदुषः | विदुषोः | विदुषाम् |
| विदुषि | विदुषोः | विद्वत्सु |
| सं० हे विद्वन् | हे विद्वांसौ | हे विद्वांसः |

एव पेचिवन्स् ।

स्त्रियां तु [४]जग्मुषी-[५]जगमुषी, विदुषी पेचुषी नदीवत् ।

अथ हान्तः ।

| | | |
|---|---|---|
| [७]मधुलिट्, मधुलिड् | मधुलिहौ | मधुलिहः |
| मधुलिहम् | मधुलिहौ | मधुलिहः |
| मधुलिहा | मधुलिड्भ्याम् | मधुलिड्भिः |

---

१. A.B. प्रतौ एतानि रूपाणि न सन्ति ।

२. अधुट्स्वरादौ सेट्कस्याऽपि वन्सेर्वशब्दस्योत्वम् [२-२-४६ का०], अनुषङ्गश्चा [क्रुञ्चेत् २-२-३९ का०] अनेन न लोप A.।

३. विरामव्यञ्जनादिष्वनडुन्नहिवन्सीनां च [२-३-४४ का०] A.।

४.५. A.B..प्रतौ नास्ति । ६. C. प्रतौ नास्ति ।

७. हो धुट्-पदान्ते [सि० २-१-८२] हकार ढकार, धुटस्तृतीयः [सि० २-१-७६] ढकार डकार, विरामे वा [सि० १-३-५१] डकार टकार A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| मधुलिहे | मधुलिड्भ्याम् | मधुलिड्भ्यः |
| मधुलिहः | मधुलिड्भ्याम् | मधुलिड्भ्यः |
| मधुलिहः | मधुलिहोः | मधुलिहाम् |
| मधुलिहि | मधुलिहोः | मधुलिट्सु |
| सं०हे मधुलिट्,मधुलिड् | हे मधुलिहौ | हे मधुलिहः |

एवं दामलिह् ।

तथा–

| | | |
|---|---|---|
| [1]अनड्वान् | अनड्वाहौ | अनड्वाहः |
| अनड्वाहम् | अनड्वाहौ | [2]अनडुहः |
| अनडुहा | [3]अनडुद्भ्याम् | अनडुद्भिः |
| अनडुहे | अनडुद्भ्याम् | अनडुद्भ्यः |
| अनडुहः | अनडुद्भ्याम् | अनडुद्भ्यः |
| अनडुहः | अनडुहोः | अनडुहाम् |
| अनडुहि | अनडुहोः | अनडुत्सु |
| [4]सं०हे अनड्वन् | हे अनड्वाहौ | हे अनड्वाहः |

स्त्रियां त्वनडुही अनड्वाही नदीवत् ।

तथा–

| | | |
|---|---|---|
| [5]प्रष्ठवाट्, प्रष्ठवाड् | प्रष्ठवाहौ | प्रष्ठवाहः |
| प्रष्ठवाहम् | प्रष्ठवाहौ | [6]प्रष्ठौहः |
| प्रष्ठौहा | प्रष्ठवाड्भ्याम् | प्रष्ठवाड्भिः |
| प्रष्ठौहे | प्रष्ठवाड्भ्याम् | प्रष्ठवाड्भ्यः |

१. वाः शेषे [सि० १-४-८२] ईणइं सूत्रिइं अनडुह्शब्दतणा उकार रहइं वा हुइ, धुटां प्राग् नोऽन्त 'अनडुहः सौ' [सि० १-४-७२] ईणइं सूत्रिइं नकारागम, दीर्घ-ङ्याब्-व्यञ्जनात् सेः [सि० १-४-४५] सि लोप, पदस्य [सि० २-१-८९] ह लोप A. ।

२. अनडुहश्च [२-२-४२ का०] A.।

३. विरामव्यञ्जनादिष्वनडुन्नहिवन्सीनां च [२-३-४४ का०] A.।
स्रंस्-ध्वंस्-क्वस्सनडुहो दः [सि० २-१-६८] C.।

४. संबुद्धावुभयोर्ह्रस्वः [२-२-४४ का०] A.।

५. पा० प्रष्टवाह् A.B. पृष्ट्वाह् C. । ६. वाहेर्वाशब्दस्यौ कातन्त्रे [२-२-४८] A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| प्रष्ठौहः | प्रष्ठवाड्भ्याम् | प्रष्ठवाड्भ्यः |
| प्रष्ठौहः | प्रष्ठौहोः | प्रष्ठौहाम् |
| प्रष्ठौहि | प्रष्ठौहोः | प्रष्ठवाट्सु |
| सं०हे प्रष्ठवाट्,प्रष्ठवाड् | हे प्रष्ठवाहौ | हे प्रष्ठवाहः |

[1]स्त्रियां तु प्रष्ठौही नदीवत् ।

तथा-

| | | |
|---|---|---|
| [2]गोधुक्, गोधुग् | गोदुहौ | गोदुहः |
| गोदुहम् | गोदुहौ | गोदुहः |
| गोदुहा | गोधुग्भ्याम् | गोधुग्भिः |
| गोदुहे | गोधुग्भ्याम् | गोधुग्भ्यः |
| गोदुहः | गोधुग्भ्याम् | गोधुग्भ्यः |
| गोदुहः | गोदुहोः | गोदुहाम् |
| गोदुहि | गोदुहोः | गोधुक्षु |
| सं०हे गोधुक्, गोधुग् | हे गोदुहौ | हे गोदुहः |

[3]स्त्रियां तु गोदुही नदीवत् ।

अथ क्षान्तः ।

| | | |
|---|---|---|
| [4]काष्ठतट्, काष्ठतड् | काष्ठतक्षौ | काष्ठतक्षः |
| काष्ठतक्षम् | काष्ठतक्षौ | काष्ठतक्षः |
| काष्ठतक्षा | काष्ठतड्भ्याम् | काष्ठतड्भिः |
| काष्ठतक्षे | काष्ठतड्भ्याम् | काष्ठतड्भ्यः |
| काष्ठतक्षः | काष्ठतड्भ्याम् | काष्ठतड्भ्यः |

---

१. पा० स्त्रियां तु नदीवत् A.B. ।

२. हच [तुर्थान्तस्य धातोस्तृतीयाद्वेरादिरादिचतुर्थत्वमकृतवत् २-३-५० का०] द् ध्, दाहेर्हस्य गः [२-३-४७ का०] हकार गकार A.।

३. पा० एवं स्त्रियां तु A.B.।

४. संयोगस्यादौ स्कोर्लुक् [सि० २-१-८८] क् लोप A., संयोगादेर्घुटः [२-३-५५ का०] A.। संयोगस्यादौ स्कोर्लुक् [सि० २-१-८८] B.C.। C. प्रतौ प्रथमायाः सर्वाणि, द्वितीयायाः एकवचनस्य, तृतीयायाः द्वि-बहुवचनयोः, चतुर्थ्याः एकवचनस्य तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| काष्ठतक्षः | काष्ठतक्षोः | काष्ठतक्षाम् |
| काष्ठतक्षि | काष्ठतक्षोः | काष्ठतट्सु |
| सं० हे काष्ठतट्, काष्ठतड् | हे काष्ठतक्षौ | हे काष्ठतक्षः |

[1]एवं साधुतक्ष्- गोरक्ष्

इति व्यञ्जनान्ताः पुंलिङ्गाः समासाः ।

★

[2]स्त्रीत्वे-

[3]त्वच्वाचौ [4]स्रुच्स्रजौ स्फिग्[5] च योषिच्च तडिद्विद्युतौ ।
सम्पदापत्प्रतिपच्च दृषच्छरच्च संविदः ॥१॥
सत्संसदौ परिषत् [6]क्षुध्-समिधौ पापसीमानौ ।
आपः ककुप्त्रिष्टुभौ[7] च गीर्धूः [8]पूर्द्वार्दिव्दिग्दृशः ॥२॥
रुट् [9]वृट् प्रावृष्[10]विप्रुषौ [11]वाऽऽशीः सजूः सुमनास्[12]तथा ।
[13]उपानहप्रमुखाः प्राज्ञैर्व्यञ्जनान्ताः स्मृताः स्त्रियाम् ॥३॥

[14]अथ व्यञ्जनान्ताः स्त्रीलिङ्गाः आरभ्यन्ते ।

तत्र प्रथमं चान्तः ।

| | | |
|---|---|---|
| [15]त्वक्, त्वग् | त्वचौ | त्वचः |
| त्वचम् | त्वचौ | त्वचः |
| त्वचा | त्वग्भ्याम् | त्वग्भिः |
| त्वचे | त्वग्भ्याम् | त्वग्भ्यः |
| त्वचः | त्वग्भ्याम् | त्वग्भ्यः |
| त्वचः | त्वचोः | त्वचाम् |

---

१. C. प्रतौ एषः पाठो नास्ति ।
२. A.B. प्रतौ नास्ति ।
३. पा० त्वग्वाचौ A.B.C.।
४. पा० स्कच्स्रजौ A.B., स्रुचस्तुचौ C.।
५. पा० स्पक् A., स्पक् B.।
६. पा० क्षुत्स० A.B.।
७. पा० ०त्रिषूभौ C.।
८. पा० पूर्वाद्वार्दिव्० C.।
९. पा० तृट् C.।
१०. पा० प्रावृट्वि० C.।
११. पा० चाऽऽशीः C.।
१२. पा० सुमनस्तथा C.।
१३. पा० उपानहमुखा C.।
१४. पा० एतेषु चान्ताः स्त्रीलिङ्गाः शब्दाः प्रारभ्यन्ते C.।
१५. चवर्गदृगादीनां च [२-३-४८ का०] A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| त्वचि | त्वचोः | त्वक्षु |
| सं०हे त्वक्, त्वग् | हे त्वचौ | हे त्वचः |

एवं वाच्-स्रुच्मुख्याः ।

अथ जान्तः ।

| | | |
|---|---|---|
| [1]स्रक्, स्रग् | स्रजौ | स्रजः |
| स्रजम् | स्रजौ | स्रजः |
| स्रजा | स्रग्भ्याम् | स्रग्भिः |
| स्रजे | स्रग्भ्याम् | स्रग्भ्यः |
| स्रजः | स्रग्भ्याम् | स्रग्भ्यः |
| स्रजः | स्रजोः | स्रजाम् |
| स्रजि | स्रजोः | स्रक्षु |
| सं० हे स्रक्, स्रग् | हे स्रजौ | हे स्रजः |

एवं स्फिर्[2]ज्प्रभृतयः ।

अथ तान्तः ।

| | | |
|---|---|---|
| [3]योषित्, योषिद् | योषितौ | योषितः |
| योषितम् | योषितौ | योषितः |
| योषिता | योषिद्भ्याम् | योषिद्भिः |
| योषिते | योषिद्भ्याम् | योषिद्भ्यः |
| योषितः | योषिद्भ्याम् | योषिद्भ्यः |
| योषितः | योषितोः | योषिताम् |
| योषिति | योषितोः | योषित्सु |
| सं०हे योषित्,योषिद् | हे योषितौ | हे योषितः |

एवं तडित्-विद्युत्-हरित्-सरित्प्रभृतयः ।

---

१. चवर्गदृगादीनां च [२-३-४८ का०] A.।

२. पा० स्पज्मुख्याः A.B.।

३. C. प्रतौ प्रथमायाः द्वितीयायाश्च सर्वाणि, तृतीयायाः एकद्विवचनसोस्तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ दान्तः ।

| | | |
|---|---|---|
| [1]सम्पत्, सम्पद् | सम्पदौ | सम्पदः |
| सम्पदम् | सम्पदौ | सम्पदः |
| सम्पदा | सम्पद्भ्याम् | सम्पद्भिः |
| सम्पदे | सम्पद्भ्याम् | सम्पद्भ्यः |
| सम्पदः | सम्पद्भ्याम् | सम्पद्भ्यः |
| सम्पदः | सम्पदोः | सम्पदाम् |
| सम्पदि | सम्पदोः | सम्पत्सु |
| सं०हे सम्पत्, सम्पद् | हे सम्पदौ | हे सम्पदः |

एवमापद्–[2]प्रतिपद्–दृषद्–शरद्–संविद्–सद्–परिषद्–विपद्[3]–[4]संसद्प्रभृतयः ।

अथ धान्तः ।

| | | |
|---|---|---|
| [5]क्षुत्, क्षुद् | क्षुधौ | क्षुधः |
| क्षुधम् | क्षुधौ | क्षुधः |
| क्षुधा | क्षुद्भ्याम् | क्षुद्भिः |
| क्षुधे | क्षुद्भ्याम् | क्षुद्भ्यः |
| क्षुधः | क्षुद्भ्याम् | क्षुद्भ्यः |
| क्षुधः | क्षुधोः | क्षुधाम् |
| क्षुधि | क्षुधोः | क्षुत्सु |
| सं०हे क्षुत्,क्षुद् | हे क्षुधौ | हे क्षुधः |

एवं क्रुध्–समिद्प्रभृतयः ।

अथ नान्तः ।

| | | |
|---|---|---|
| पामा | पामानौ | पामानः |
| पामानम् | पामानौ | पाम्नः |

---

१. C. प्रतौ प्रथमायाः सर्वाणि, द्वितीयायाः द्विवचनस्य तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

२. C. प्रतौ नास्ति ।　　　　३.४. A.B. प्रतौ नास्ति ।

५. अघोषे प्रथम [२-३-६१ का०] A.। C. प्रतौ प्रथमायाः सर्वाणि, द्वितीयायाः एकवचनस्य, तृतीयायाः एकद्विवचनयोस्तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

| | | |
|---|---|---|
| पाम्ना | पामभ्याम् | पामभिः |
| पाम्ने | पामभ्याम् | पामभ्यः |
| पाम्नः | पामभ्याम् | पामभ्यः |
| पाम्नः | पाम्नोः | पामसु |
| [1]पाम्नि, पामनि | पाम्नोः | पामसु |
| सं०हे पामन् | हे पामानौ | हे पामानः |

एवं सीमन् । विकल्पेन पामा-सीमा श्रद्धावत् ।

अथ पान्तः ।

[2]आपः [3]अपः [4]अद्भिः अद्भ्यः अद्भ्यः अपाम् अप्सु सं०हे आपः ।

अथ भान्तः ।

| | | |
|---|---|---|
| [5]ककुप्, ककुब् | ककुभौ | ककुभः |
| ककुभम् | ककुभौ | ककुभः |
| ककुभा | ककुब्भ्याम् | ककुब्भिः |
| ककुभे | ककुब्भ्याम् | ककुब्भ्यः |
| ककुभः | ककुब्भ्याम् | ककुब्भ्यः |
| ककुभः | ककुभोः | ककुभाम् |
| ककुभि | ककुभोः | ककुप्सु |
| सं०हे ककुप्, ककुब् | हे ककुभौ | हे ककुभः |

[6]एवं त्रिष्टुभ्-विधभृप्रभृतयः ।

अथ रान्तः ।

| | | |
|---|---|---|
| [7]गीः | गिरौ | गिरः |

१. ईड्योर्वा [२-२-५४ का०] A.। C. प्रतौ पाम्नि इत्येकमेव रूपमस्ति ।

२. अपश्च [२-२-१३ का०] दीर्घ A.। C. प्रतौ अपृशब्दस्य रूपाणि न सन्ति ।

३. B. प्रतौ एतद् रूपं नास्ति A.। ४. अपां भे दः [२-३-४३ का०] A.।

५. हचतुर्थान्तस्य धातो[स्तृतीयादेरादिचतुर्थत्वमकृतवत् [२-३-५० का०], वा विरामे [२-३-६२ का०] बकार पकार A.। C. प्रतौ प्रथमायाः तृतीयायाश्च एकद्विवचनयोः, चतुर्थ्याः एकवचनस्य तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

६. पा० एवं विधभृप्रभृतयः A.B., एवं त्रिष्टुप्मुखाः C.।

७. इरुरोरीसूरौ [२-३-५२ का०] पदान्ते गिरइ गीरइ A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| गिरम् | गिरौ | गिरः |
| गिरा | गीर्भ्याम् | गीर्भिः |
| गिरे | गीर्भ्याम् | गीर्भ्यः |
| गिरः | गीर्भ्याम् | गीर्भ्यः |
| गिरः | गिरोः | गिराम् |
| गिरि | गिरोः | गीर्षु |
| सं०हे गीः | हे गिरौ | हे गिरः |

एवं धुर्-पुर्-द्वार्प्रभृतयः ।

अथ वान्तः ।

| | | |
|---|---|---|
| [1]द्यौः | दिवौ | दिवः |
| [2]दिवम् | दिवौ | दिवः |
| दिवा | [3]द्युभ्याम् | द्युभिः |
| दिवे | द्युभ्याम् | द्युभ्यः |
| दिवः | द्युभ्याम् | द्युभ्यः |
| दिवः | दिवोः | दिवाम् |
| दिवि | दिवोः | द्युषु |
| सं०हे द्यौः | हे दिवौ | हे दिवः |

एतमतिदिव् ।

अथ शान्तः ।

| | | |
|---|---|---|
| [4]दिक्, दिग् | दिशौ | दिशः |
| दिशम् | दिशौ | दिशः |
| दिशा | [5]दिग्भ्याम् | दिग्भिः |

१. औ सौ [२-२-२६ का०] वकार औकार A.। C. प्रतौ प्रथमायाः सर्वाणि द्वितीयायाः एकवचनस्य, तृतीयायाः द्विवचनस्य, तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

२. वाम्या [२-२-२७ का०] वकार आ A.।

३. दिव उद् व्यञ्जने [२-२-२५ का०] वकार उकार A.।

४. चवर्ग [दृगादीनां च २-३-४८ का०], अघोषे प्रथमः [२-३-६१ का०] A.। C. प्रतौ प्रथमायाः सर्वाणि, तृतीयायाः एकद्विवचनयोस्तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

५. चवर्गदृगादीनां च [२-३-४८ का०] शकार गकार् A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| दिशे | दिग्भ्याम् | दिग्भ्यः |
| दिशः | दिग्भ्याम् | दिग्भ्यः |
| दिशः | दिशोः | दिशाम् |
| दिशि | दिशोः | दिक्षु |
| सं०हे दिक्, दिग् | हे दिशौ | हे दिशः |

एवं दृश्प्रभृतयः ।

अथ षान्तः ।

| | | |
|---|---|---|
| [1]रुट्, रुड् | रुषौ | रुषः |
| रुषम् | रुषौ | रुषः |
| रुषा | रुड्भ्याम् | रुड्भिः |
| रुषे | रुड्भ्याम् | रुड्भ्यः |
| रुषः | रुड्भ्याम् | रुड्भ्यः |
| रुषः | रुषोः | रुषाम् |
| रुषि | रुषोः | रुट्सु |
| सं० हे रुट्, रुड् | हे रुषौ | हे रुषः |

एवं [2]भृष्-तृर्ष्[3]-प्रौवृष्-विप्रुष्प्रभृतयः ।

तथा-

| | | |
|---|---|---|
| [5]आशीः | आशिषौ | आशिषः |
| आशिषम् | आशिषौ | आशिषः |
| आशिषा | आशीर्भ्याम् | आशीर्भिः |
| आशिषे | आशीर्भ्याम् | आशीर्भ्यः |
| आशिषः | आशीर्भ्याम् | आशीर्भ्यः |
| आशिषः | आशिषोः | आशिषाम् |
| आशिषि | आशिषोः | आशिषाम् |
| सं०हे आशीः | हे आशिषौ | हे आशिषः |

एवं सजुष् ।

१. हशषछान्तेजादीनां डः [२-३-४६ का०] A.

२. C. प्रतौ नास्ति । ३-४. B. प्रतौ नास्ति ।

५. सजुषाशिषो रः [२-३-५१ का०] इरुरोरीरुरौ [२-३-५२ का०] A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ सान्तः ।

| | | |
|---|---|---|
| [१]सुमनाः | सुमनसौ | सुमनसः |
| सुमनसम् | सुमनसौ | सुमनसः |
| सुमनसा | सुमनोभ्याम् | सुमनोभिः |
| सुमनसे | सुमनोभ्याम् | सुमनोभ्यः |
| सुमनसः | सुमनोभ्याम् | सुमनोभ्यः |
| सुमनसः | सुमनसोः | सुमनसाम् |
| सुमनसि | सुमनसोः | सुमनस्सु |
| सं०हे सुमनः | हे सुमनसौ | हे सुमनसः |

एवमन्येऽपि ।

अथ हान्तः ।

| | | |
|---|---|---|
| [२]उपानत्, उपानद् | उपानहौ | उपानहः |
| उपानहम् | उपानहौ | उपानहः |
| उपानहा | उपानद्भ्याम् | उपानद्भिः |
| उपानहे | उपानद्भ्याम् | उपानद्भ्यः |
| उपानहः | उपानद्भ्याम् | उपानद्भ्यः |
| उपानहः | उपानहोः | उपानहाम् |
| उपानहि | उपानहोः | उपानत्सु |
| सं०हे उपानत्, उपानद् | हे उपानहौ | हे उपानहः |

एवं व्यञ्जनान्ताः स्त्रीलिङ्गा समाप्ताः ।

★

अथ नपुंसकव्यञ्जनान्ता आरभ्यन्ते ।

जगदुदश्वित्पृषैती[३] जन्म कर्म च [४]चर्म्म च ।
[५]वर्म शर्मपर्वणी च सामदाम्नी च भस्म च ॥१॥

---

१. पा० सुमनः A.B. । C. प्रतौ प्रथमायाः सर्वाणि, द्वितीयायाः एकवचनस्य तृतीयायाः द्विबहुवचनयोः, चतुर्थ्याः एकवचनस्य तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

२. विरामव्यञ्जनादिष्वनडुन्नहिवन्सीनां च [२-३-४४ का०] A.।

३. पा० ०पृषतौ A.B., ०पृषतो C.। ४. पा० वर्म्म C.। ५. पा० चर्म C.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहःस्वपी मनः सर्प्पि-र्यशोऽरुश्च[१] [२]वयः पयः ।
चेतो [३]बर्हिर्धनु[४]र्ज्योति-रायुर्वपू[५] रजो यजुः[६] ॥२॥

तत्र प्रथमं तान्तः ।

| | | |
|---|---|---|
| [७]जगत्, जगद् | जगती | जगन्ति |
| जगत्, जगद् | जगती | जगन्ति |
| जगता | जगद्भ्याम् | जगद्भिः |
| जगते | जगद्भ्याम् | जगद्भ्यः |
| जगतः | जगद्भ्याम् | जगद्भ्यः |
| जगतः | जगतोः | जगताम् |
| जगति | जगतोः | जगत्सु |
| सं०हे जगत्, जगद् | हे जगती | हे जगन्ति |

एवमुदश्वित्-पृषत् प्रमुखाः[८] ।

अथ नान्तः ।

| | | |
|---|---|---|
| [९]जन्म | जन्मनी | जन्मानि |
| जन्म | जन्मनी | जन्मानि |
| जन्मना | जन्मभ्याम् | जन्मभिः |
| जन्मने | जन्मभ्याम् | जन्मभ्यः |
| जन्मनः | जन्मभ्याम् | जन्मभ्यः |
| जन्मनः | जन्मनोः | जन्मनाम् |
| जन्मनि | जन्मनोः | जन्मसु |
| सं०हे जन्म[१०], जन्मन् | हे जन्मनी | हे जन्मानि |

---

१. पा० यशोऽरुच्च C.।
२. पा० पयो वयः C.।
३. पा० बहिधनु० A.B.।
४. पा० जोति० A.B.।
५. पा० वपु A.B.C.।
६. पा० यजु A.B., युजः C.।
७. नपुंसकात् स्यमोर्लोपो [न च तदुक्तम् २-२-६ का०] सिलोप, धुटां तृतीयः [२-३-६० का०] तकार दकार A.।
८. पा० एवं तन्-पृषत्प्रभृतयः A.B.।
९. नपुंसकात् स्यमोर्लोपो [न च तदुक्तम् २-२-६ का०] A.।
१०. क्लीबे वा [सि० २-१-९३] न लोप C.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]एवं कर्म्मन्-चर्म्मन्-वर्म्मन्-शर्म्मन्-पर्व्वन्-भस्मन्प्रभृतयः ।

तथा-

| | | |
|---|---|---|
| [2]साम | [3]साम्नी, सामनी | सामानि |
| साम | साम्नी, सामनी | सामानि |
| साम्ना | सामभ्याम् | सामभिः |
| साम्ने | सामभ्याम् | सामभ्यः |
| साम्नः | सामभ्याम् | सामभ्यः |
| साम्नः | साम्नोः | साम्नाम् |
| साम्नि, सामनि | साम्नोः | सामसु |
| सं०हे साम, सामन् | हे साम्नी, सामनी | हे सामानि |

एवं दामन्-लोमन्-रोमन्प्रभृतयः ।

तथा-

| | | |
|---|---|---|
| [4]अहः | अह्नी, अहनी | अहानि |
| अहः | अह्नी, अहनी | अहानि |
| अह्ना | अहोभ्याम् | अहोभिः |
| अह्ने | अहोभ्याम् | अहोभ्यः |
| अह्नः | अहोभ्याम् | अहोभ्यः |
| अह्नः | अह्नोः | अह्नाम् |
| अह्नि, अहनि | अह्नोः | अह(हः?)सु |
| सं० हे अहः | हे अह्नी, अहनी | हे अहानि |

---

१. एवं कर्मन्प्रभृतयः C.।

२. C. प्रतौ प्रथमायाः द्वितीयायाश्च सर्वाणि, तृतीयायाः एकद्विवचनयोस्तथा सप्तम्याः सर्वाणि रूपाणि सन्ति ।

३. ईङ्योर्वा [२-२-५४ का०] अ लोप A.।

४. C. प्रतौ प्रथमायाः द्वितीयायाः तृतीयायाश्च सर्वाणि, चतुर्थ्याः एकवचनस्य तथा सप्तम्याः सर्वाणि रूपाणि सन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ पान्तः ।

| | | |
|---|---|---|
| स्वप्, स्वब्[१] | स्वपी | [२]स्वाम्पि, [३]स्वम्पि |
| स्वप्, स्वब् | स्वपी | स्वाम्पि, स्वम्पि |
| स्वपा | स्वब्भ्याम् | स्वब्भिः |
| स्वपे | स्वब्भ्याम् | स्वब्भ्यः |
| स्वपः | स्वब्भ्याम् | स्वब्भ्यः |
| स्वपः | स्वपोः | स्वपाम् |
| स्वपि | स्वपोः | स्वप्सु |
| सं०हे स्वप्, स्वब् | हे स्वपी | हे स्वाम्पि, स्वम्पि |

अथ सान्तः ।

| | | |
|---|---|---|
| [४]मनः | मनसी | मनांसि |
| मनः | मनसी | मनांसि |
| मनसा | मनोभ्याम् | मनोभिः |
| मनसे | मनोभ्याम् | मनोभ्यः |
| मनसः | मनोभ्याम् | मनोभ्यः |
| मनसः | मनसोः | मनसाम् |
| मनसि | मनसोः | मनस्सु |
| सं०हे मनः | हे मनसी | हे मनांसि |

एवं यशस्-चेतस्-पयस्-रजस्-प्रेयँस्प्रभृतयः ।

तथा-

| | | |
|---|---|---|
| सर्प्पिः | सर्प्पिषी | सर्प्पीँषि |
| सर्प्पिः | सर्प्पिषी | सर्प्पीँषि |
| सर्प्पिषा | सर्प्पिर्भ्याम् | सर्प्पिर्भिः |

---

१. वा विरामे [२-३-६२ का०] पकार बकार A.। C. प्रतौ प्रथमायाः द्वितीयायाः तृतीयायाश्च सर्वाणि, चतुर्थ्याः एकद्विवचनयोस्तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

२. नि वा [सि० १-४-८९] C. ।

३. A.B. प्रतौ एतद् रूपं नास्ति ।

४. C प्रतौ प्रथमायाः द्वितीयायाश्च सर्वाणि, तृतीयायाः एकद्विवचनयोस्तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

५. A.B. प्रतौ नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| सर्प्पिषे | सर्प्पिर्भ्याम् | सर्प्पिर्भ्यः |
| सर्प्पिषः | सर्प्पिर्भ्याम् | सर्प्पिर्भ्यः |
| सर्प्पिषः | सर्प्पिषोः | सर्प्पिषाम् |
| सर्प्पिषि: | सर्प्पिषोः | सर्प्पिष्षु |
| सं०हे सर्प्पिः | हे सर्प्पिषी | हे सर्प्पींषि |

एवमरुस्-बर्हिस्-धनुस्-ज्योतिस्-आयुस्-वपुस्-[१]यशस्-[२]यजुस् प्रभृतयः ।
एवं व्यञ्जनान्ता नपुंसकाः समाप्ताः ।

★

अथ विशेषशब्दाः प्रारभ्यन्ते ।

| | | |
|---|---|---|
| दन्तः | दन्तौ | दन्ताः |
| दन्तम् | दन्तौ | [३]दतः, दन्तान् |
| दता, दन्तेन | [४]दद्भ्याम्, [५]दन्ताभ्याम् | दद्भिः, दन्तैः |
| दते, दन्ताय | दद्भ्याम्, दन्ताभ्याम् | दद्भ्यः, दन्तेभ्यः |
| दतः, दन्तात् | दद्भ्याम्, दन्ताभ्याम् | दद्भ्यः, दन्तेभ्यः |
| दतः, दन्तस्य | दतोः, दन्तयोः | दताम्, दन्तानाम् |
| दति, दन्ते | दतोः, दन्तयोः | द[६]थ्सु, द[७]त्सु, दन्तेषु |
| सं०हे दन्त | हे दन्तौ | हे दन्ताः |

---

१. A.B. प्रतौ नास्ति । २. C. प्रतौ नास्ति ।

३. दन्तपादनासिकाहृदयासृग्यूषोदकदोर्यकृच्छकृतां वा शसादिकविभक्तिनिमित्तभूतिइं दन्त दत् आदेश हुइ, पाद पद्, नासिका नस्, हृद्, असन्, यूषन्, उदन्, दोषन्, यकन्, शकन् वा स्यात् A.। दन्त, पाद, नासिका, हृदय, असृज्, यूष, उदक, दोष्, यकृत्, शकृत् [इत्येतेषां] क्रमेण दत्, पद्, नस्, हृद्, असन्, यूषन्, उदन्, दोषन्, यकन्, शकन् आदेशाः भवन्ति B.। दन्तपादनासिकाहृदयासृग्यूषोदकदोर्यकृ [च्छकृतो दत्-पन्नस्-हृदसन्-यूषन्नुदन्-दोषन्-यकन् शकन् वा सि० २-१-१०१] इत्यनेन शसादौ दन्तादीनां यथासङ्ख्यं दत् इत्यादयो वा स्युः C.।

४. धुटां तृतीयः [२-३-६० का०] तकार दकार A.।

५. अकारो दीर्घं घोषवति [२-१-१४ का०] A.।

६. शिट्याद्यस्य द्वितीयो वा [सि० १-३-५९] त थ । वर्ग्रादिशषशेषद्वितीयो वा त थ [?] । A. । शिट् प्रथमद्वितीयस्य तकार थकार हैम B.। शिट्याद्यस्य द्वितीयो वा [सि० १-३-५९] C.। ७. A.B.C. प्रतौ नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| [१]पादः | पादौ | पादाः |
| पादम् | पादौ | पदः, पादान् |
| पादा, पादेन | पाद्भ्याम्, पादाभ्याम् | पद्भिः, पादैः |
| पदे, पादाय | पद्भ्याम्, पादाभ्याम् | पद्भ्यः, पादेभ्यः |
| पदः, पादात् | पद्भ्याम्, पादाभ्याम् | पद्भ्यः, पादेभ्यः |
| पदः, पादस्य | पदोः, पादयोः | पदाम्, पादानाम् |
| पदि, पादे | पदोः, पादयोः | पथ्सु, [२]पत्सु, पादेषु |
| सं० हे पाद | हे पादौ | हे पादः |

| | | |
|---|---|---|
| [३]नासिका | नासिके | नासिकाः |
| नासिकाम् | नासिके | नसः, नासिकाः |
| नसा, नासिकया | [४]नोभ्याम्,नासिकाभ्याम् | [५]नोभिः,नासिकाभिः |
| नसे, नासिकायै | [६]नोभ्याम्,नासिकाभ्याम् | [७]नोभ्यः,नासिकाभ्यः |
| नसः,नासिकायाः | [८]नोभ्याम्,नासिकाभ्याम् | [९]नोभ्यः,नासिकाभ्यः |
| नसः, नासिकायाः | नसोः, नासिकयोः | नसाम्,नासिकानाम् |
| नसि, नासिकायाम् | नसोः, नासिकयोः | [१०]नथ्सु,नत्सु,नासिकासु |
| सं० हे नासिके | हे नासिके | हे नासिकाः |

| | | |
|---|---|---|
| [११]हृदयम् | हृदये | हृदयानि |
| हृदयम् | हृदये | [१२]हृन्दि, हृदयानि |

१. पादः देववत्, पादान् पदः, पादेन पदा, पादाभ्यां पद्भ्याम् इत्येतान्येव रूपाणि सन्ति C.।

२. A.B. प्रतौ नास्ति ।

३. C. प्रतौ प्रथमायाः द्वितीयायाः तृतीयायाश्च सर्वाणि, चतुर्थ्याः एकवचनस्य तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

४-५-६. A.B. प्रतौ नास्ति । तत्र नद्भ्याम् इति रूपमस्ति । लवर्णतवर्ग्रलसादन्त्यात् इति - यात् स० दकार [?] A.।

७-८-९. A.B. प्रतौ नास्ति । तत्र नद्भिः, नद्भ्यः, नद्भ्यः इति रूपाणि सन्ति ।

१०. नथ्सु, नस्सु, नासिकासु A.B., नासिकासु, नस्सु C.।

११. प्रथमायाः द्वितीयायाश्च सर्वाणि, तृतीयायाः एकद्विवचनयोस्तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति प्रतौ C.।

१२. दन्तपाद० [सि० २-१-१०१] इत्यादिना C. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| हृदा, हृदयेन | हृद्भ्याम्, हृदयाभ्याम् | हृद्भिः, हृदयैः |
| हृदे, हृदयाय | हृद्भ्याम्, हृदयाभ्याम् | हृद्भ्यः, हृदयेभ्यः |
| हृदः, हृदयात् | हृद्भ्याम्, हृदयाभ्याम् | हृद्भ्यः, हृदयेभ्यः |
| हृदः, हृदयस्य | हृदोः, हृदययोः | हृदाम्, हृदयानाम् |
| हृदि, हृदये | हृदोः, हृदययोः | [१]हृथ्सु, हृत्सु, हृदयेषु |
| सं० हे हृदय | हे हृदये | हे हृदयानि |
| [२]असृक्, असृग् | असृजी | असृंजि |
| असृक्, असृग् | असृजी | असानि, असृंजि |
| [३]अस्ना, असृजा | असभ्याम्, असृग्भ्याम् | असभिः, असृग्भिः |
| अस्ने, असृजे | असभ्याम्, असृग्भ्याम् | असभ्यः, असृग्भ्यः |
| अस्नः, असृजः | असभ्याम्, असृग्भ्याम् | असभ्यः, असृग्भ्यः |
| अस्नः, असृजः | अस्नोः, असृजोः | अस्नाम्, असृजाम् |
| अस्नि, [४]असनि, असृजि | अस्नोः, असृजोः | [५]अससु, असृक्षु |
| सं०हे असृक्, असृग् | हे असृजी | हे असृंजि |
| [६]यूषः | यूषौ | यूषाः |
| यूषम् | यूषौ | [७]यूष्णः, यूषान् |
| यूष्णा, यूषेण | यूषभ्याम्, यूषाभ्याम् | यूषभिः, यूषैः |
| यूष्णे, यूषाय | यूषभ्याम्, यूषाभ्याम् | यूषभ्यः, यूषेभ्यः |
| यूष्णः, यूषात् | यूषभ्याम्, यूषाभ्याम् | यूषभ्यः, यूषेभ्यः |
| यूष्णः, यूषस्य | यूष्णोः, यूषयोः | यूष्णाम्, यूषाणाम् |

१. वर्ग्रादिशषशेषद्वितीयो वा त थ [?] A.।

२. चवर्गदृगादीनां च [२-३-४८ का०] A.। C. प्रतौ प्रथमायाः द्वितीयायाः तृतीयायाश्च सर्वाणि, चतुर्थ्याः एकवचनस्य तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

३. अवमसंयोगादनोऽलोपो [ऽलुप्तवच्च पूर्वविधौ २-२-५३ का०] A.।

४. B. प्रतौ नास्ति ।

५. अस्सु A.B.।

६. C. प्रतौ प्रथमायाः द्वितीयायाश्च सर्वाणि, तृतीयायाः एकद्विवचनयोस्तथा सप्तम्याः सर्वाणि रूपाणि सन्ति ।

७. अवमसंयोगादनोऽलोपो [ऽलुप्तवच्च पूर्वविधौ २-२-५३ का०] A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| यूष्णि, यूषणि, यूषे | यूष्णोः, यूषयोः | यूषसु, यूषेसु |
| सं० हे यूष | हे यूषौ | हे यूषाः |
| [1]उदकम् | उदके | उदकानि |
| उदकम् | उदके | उदानि, उदकानि |
| [2]उद्ना, उदकेन | [3]उदभ्याम्, उदकाभ्याम् | उदभिः, उदकैः |
| उद्ने, उदकाय | उदभ्याम्, उदकाभ्याम् | उदभ्यः, उदकेभ्यः |
| उद्नः, उदकात् | उदभ्याम्, उदकाभ्याम् | उदभ्यः, उदकेभ्यः |
| उद्नः, उदकस्य | उद्नोः, उदकयोः | उद्नाम्, उदकानाम् |
| उदिन्, उदनि, उदके | उद्नोः, उदकयोः | उदसु, उदकेषु |
| सं०हे उदक | हे उदके | हे उदकानि |
| [4]दोः | दोषौ | दोषः |
| दोषम् | दोषौ | दोष्णः, दोषः |
| दोष्णा, दोषा | [5]दोर्भ्याम्, दोषभ्याम् | दोर्भिः, दोषभिः |
| दोष्णे, दोषे | दोर्भ्याम्, दोषभ्याम् | दोर्भ्यः, दोषभ्यः |
| दोष्णः, दोषः | दोष्णोः, दोषोः | दोष्णाम्, दोषाम् |
| दोष्णि, दोषणि,दोषि | दोष्णोः, दोषोः | [6]दोष्षु, [7]दोःषु, दोषसु |
| सं०हे दोः | हे दोषौ | हे दोषः |

नपुंसके-

| | | |
|---|---|---|
| दोः | [8]दोषी | दोंषि |
| दोः | [9]दोषी | दोंषि, दोषाणि |

शेषं पुंलिङ्गवत् ।

१. C. प्रतौ प्रथमायाः द्वितीयायाः तृतीयायाश्च सर्वाणि, चतुर्थ्याः एकवचनस्य तथा सप्तम्याः सर्वाणि रूपाणि सन्ति ।

२. अवमसंयोगा [दनोऽलोपोऽलुप्तवच्च पूर्वविधौ २-२-५३ का०] अकार लोप A.।

३. लिङ्गान्तनकारस्य [२-३-५६ का०] नकार लोप A.।

४. C. प्रतौ प्रथमायाः द्वितीयायाः तृतीयायाश्च सर्वाणि, चतुर्थ्याः एकवचनस्य तथा सप्तम्याः सर्वाणि रूपाणि सन्ति ।

५. इसुसुदोषां घोषवति रः [२-३-५९ का०] सकार रेफ A.।

६. पा० दोस्सु A.B.C.। ७. A.B.C. प्रतौ नास्ति । ८-९. पा० दोषणी C.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| [1]यकृत्, यकृद् | यकृती | यकृन्ति |
| यकृत्, यकृद् | यकृती | यकानि, यकृन्ति |
| यक्ना, यकृता | यकभ्याम्, यकृद्भ्याम् | यकभिः, यकृद्भिः |
| यक्ने, यकृते | यकभ्याम्, यकृद्भ्याम् | यकभ्यः, यकृद्भ्यः |
| यक्नः, यकृतः | यकभ्याम्, यकृद्भ्याम् | यकभ्यः, यकृद्भ्यः |
| यक्नः, यकृतः | यक्नो, यकृतोः | यक्नाम्, यकृताम् |
| यक्नि,यकनि,यकृति | यक्नोः, यकृतोः | यकसु, [2]यकृत्सु |
| सं०हे यकृत्, यकृद् | हे यकृती | हे यकृन्ति |
| [3]शकृत्, शकृद् | शकृती | शकृन्ति |
| शकृत्, शकृद् | शकृती | शकानि, शकृन्ति |
| शक्ना, शकृता | शकभ्याम्, शकृद्भ्याम् | शकभिः, शकृद्भिः |
| शक्ने, शकृते | शकभ्याम्, शकृद्भ्याम् | शकभ्यः, शकृद्भ्यः |
| शक्नः, शकृतः | शकभ्याम्, शकृद्भ्याम् | शकभ्यः, शकृद्भ्यः |
| शक्नः, शकृतः | शक्नोः, शकृतोः | शक्नाम्, शकृताम् |
| शक्नि,शकनि,शकृति | शक्नोः, शकृतोः | शकसु, शकृत्सु |
| सं०हे शकृत्,शकृद | हे शकृती | हे शकृन्ति |
| [4]मासः | मासौ | मासाः |
| मासम् | मासौ | [5]मासः, मासान् |
| मासा, मासेन | माद्भ्याम्, मासाभ्याम् | मादि्भः, मासैः |
| मासे, मासाय | माद्भ्याम्, मासाभ्याम् | माद्भ्यः, मासेभ्यः |

१. C. प्रतौ प्रथमायाः द्वितीयायाः तृतीयायाश्च सर्वाणि, चतुर्थ्याः एकवचनस्य तथा सप्तम्याः सर्वाणि रूपाणि सन्ति ।

२. पा० यकृक्षु A.।

३. C. प्रतौ प्रथमायाः द्वितीयायाश्च सर्वाणि, तृतीयाया एकद्विवचनयोस्य तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

४. C. प्रतौ प्रथमायाः द्वितीयायाः तृतीयायाश्च सर्वाणि, चतुर्थ्याः एकवचनस्य तथा सप्तम्याः बहुवचनस्य रूपाणि सन्ति ।

५. मासनिशासनस्य शसादौ लुग्वा [सि० २-१-१००] मास् निस्(श्) आसन् आदेशा । मासनिशासनस्य शसादौ लुग्वा [सि० २-१-१००] C.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| मासः, मासात् | माद्भ्याम्, मासाभ्याम् | माद्भ्यः, मासेभ्यः |
| मासः, मासस्य | मासोः, मासयोः | मासाम्, मासानाम् |
| मसि, मासे | मासोः, मासयोः | माथ्सु, [1]माससु, मासेषु |
| सं० हे मास | हे मासौ | हे मासाः |
| [2]निशा | निशे | निशाः |
| निशाम् | निशे | निशः, निशाः |
| निशा, निशया | [3]निज्भ्याम्, निशाभ्याम् | निज्भिः, निशाभिः |
| निशे, निशायै | निज्भ्याम्, निशाभ्याम् | निज्भ्यः, निशाभ्यः |
| निशः, निशायाः | निज्भ्याम्, निशाभ्याम् | निज्भ्यः, निशाभ्यः |
| निशः, निशायाः | निशोः, निशयोः | निशाम्, निशानाम् |
| निशि, निशायाम् | निशोः, निशयोः | निच्शु, [4]निच्छु, निशासु |
| सं० हे निशे | हे निशे | हे निशाः |
| [5]आसनम् | आसने | आसनानि |
| आसनम् | आसने | आसानि, आसनानि |
| [6]आस्ना, आसनेन | आसभ्याम्, [7]आसनाभ्याम् | आसभिः, आसनैः |
| आस्ने, आसनाय | आसभ्याम्, आसनाभ्याम् | आसभ्यः, आसनेभ्यः |

१. मास्सु, मासेषु द्वे रूपे स्तः C.।

२. C. प्रतौ प्रथमायाः द्वितीयायाः तृतीयायाश्च सर्वाणि, चतुर्थ्याः एकवचनस्य तथा सप्तम्याः सर्वाणि रूपाणि सन्ति ।

३. 'इवर्णचवर्गयशास्तालव्या' इति वचनात् स्थानतरतमत्वे धुटां तृतीयः [२-३-६० का०] इत्यनेन शस्य जो भवति A. । (?)

४. व्याकरणसूत्रं सस्य शषौ [सि० १-३-६१] सकारस्य स्थाने शः, चवर्गटवर्गाभ्यां योगे यथासङ्ख्यं सकारस्य शकारषकारौ आदेशौ भवति (तः) । इवर्णचवर्गाः सस्थाने तरतम अघोषे प्रथमः [२-३-६१ का०] अनेन जकार चकार कृत्वा वर्गप्रथमा इत्यादिना शकारस्य छकारि A. । (?)

५. C. प्रतौ प्रथमायाः द्वितीयायाः तृतीयायाश्च सर्वाणि, चतुर्थ्याः एकवचनस्य तथा सप्तम्याः सर्वाणि रूपाणि सन्ति A.।

६. अवमसंयोगा [दनोऽलोपोऽलुप्तवच्च पूर्वविधौ २-२-५३ का०] अकार लोप, स्वरादेशः पर निमित्तकः प्रतिस्थानि वदति A.।

७. लिङ्गान्तनकारस्य [२-३-५६ का०] नकारलोपाभावे A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| आस्नः, आसनात् | आसभ्याम्, आसनाभ्याम् | आसभ्यः, आसनेभ्यः |
| आस्नः, आसनस्य | आस्नोः, आसनयोः | आस्नाम्, आसनानाम् |
| आस्नि,आसनि,आसने | आस्नोः, आसनयोः | [1]आससु, आसनेषु |
| सं० हे आसन | आसने | हे आसनानि |

| | | |
|---|---|---|
| [2]सखा | [3]सखायौ | सखायः |
| सखायम् | सखायौ | सखीन् |
| सख्या | सखिभ्याम् | सखिभिः |
| सख्ये | सखिभ्याम् | सखिभ्यः |
| सख्युः | सखिभ्याम् | सखिभ्यः |
| सख्युः | सख्योः | सखीनाम् |
| सख्यौ | सख्योः | सखिषु |
| सं० हे सखे | हे सखायौ | हे सखायः |

एवम्–

| | | |
|---|---|---|
| [4]पतिः | पती | पतयः |
| पतिम् | पती | पतीन् |
| पत्या | पतिभ्याम् | पतिभिः |
| पत्ये | पतिभ्याम् | पतिभ्यः |
| पत्युः | पतिभ्याम् | पतिभ्यः |
| पत्युः | पत्योः | पतीनाम् |
| [5]पत्यौ | पत्योः | पतिषु |
| सं० हे पते | हे पती | हे पतयः |

तथा–

| | | |
|---|---|---|
| पन्थाः | [6]पन्थानौ | पन्थानः |

१. पा० आस्सु A.B.।
२. सख्युश्च अन्तो अन् A. । A.B. प्रतौ प्रथमायाः द्वितीयायाश्च रूपाणि सन्ति ।
३. घुटि त्वै [२-२-२४ का०] A.।
४. प्रतौ प्रथमायाः द्वितीयायाश्च सर्वाणि तथा तृतीयायाः एकवचनस्य रूपाणि सन्ति ।
५. सखिपत्योर्ङिः [२-१-६१ का०] A.।
६. अनन्तो घुटि [२-२-३६ का०] अन्ते अन् घुटि चासौ A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| पन्थानम् | पन्थानौ | [१]पथः |
| पथा | पथिभ्याम् | [२]पथिभिः |
| पथे | पथिभ्याम् | पथिभ्यः |
| पथः | पथिभ्याम् | पथिभ्यः |
| पथः | पथोः | पथाम् |
| पथि | पथोः | पथिषु |
| सं० हे पन्थाः[३] | हे पन्थानौ | हे पन्थानः |

एवं [४]मथिन्-ऋभुक्षिन् ।

| | | |
|---|---|---|
| पुमान् | पुमांसौ | पुमांसः |
| पुमांसम् | पुमांसौ | पुंसः |
| पुंसा | पुंभ्याम् | पुंभिः |
| पुंसे | पुंभ्याम् | पुंभ्यः |
| पुंसः | पुंभ्याम् | पुंभ्यः |
| पुंसः | पुंसोः | पुंसाम् |
| पुंसि | पुंसोः | पुंसु |
| सं० हे पुमान् | हे पुमांसौ | हे पुमांसः |

तथा-

| | | |
|---|---|---|
| भूः | भुवौ | भुवः |
| भुवम् | भुवौ | भुवः |
| भुवा | भूभ्याम् | भूभिः |
| भुवे | भूभ्याम् | भूभ्यः |
| भुवः | भूभ्याम् | भूभ्यः |
| भुवः | भुवोः | भुवाम् |
| भुवि | भुवोः | भूषु |

---

१. अघुट्स्वरे लोपम् [२-२-३७ का०] A. ।

२. व्यञ्जने चैषां [२-२-३८ का०] A. ।

३. हे पन्था A.B.C.।

४. पा० मथि-ऋभुक्षि A.B.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| सं० हे भूः | हे भुवौ | हे भुवः |

एवं [1]मनोभूः भ्रूरपि ।

| | | |
|---|---|---|
| वर्षाभूः | वर्षाभ्वौ | वर्षाभ्वः |
| वर्षाभ्वम् | वर्षाभ्वौ | वर्षाभ्वः |
| वर्षाभ्वा | वर्षाभूभ्याम् | वर्षाभूभिः |
| वर्षाभ्वे | वर्षाभूभ्याम् | वर्षाभूभ्यः |
| वर्षाभ्वः | वर्षाभूभ्याम् | वर्षाभूभ्यः |
| वर्षाभ्वः | वर्षाभ्वोः | [2]वर्षाभ्वाम् |
| [3]वर्षाभ्वि | वर्षाभ्वोः | वर्षाभूषु |
| सं० हे वर्षाभूः | हे वर्षाभ्वौ | हे वर्षाभ्वः |

एवं [4]दृन्भू-पुनर्भू-[5]कारभूरपि ।

| | | |
|---|---|---|
| श्रीः | श्रियौ | श्रियः |
| श्रियम् | श्रियौ | श्रियः |
| श्रिया | श्रीभ्याम् | श्रीभिः |
| [6]श्रिये, श्रियै[7] | श्रीभ्याम् | श्रीभ्यः |
| श्रियः, श्रियाः | श्रीभ्याम् | श्रीभ्यः |
| श्रियः, श्रियाः | श्रियोः | श्रियाम्, श्रीणाम् |
| श्रियि, श्रियाम् | श्रियोः | श्रीषु |
| सं० हे श्रीः | हे श्रियौ | हे श्रियः |

एवं [8]ह्री-धी-भीः ।

| | | |
|---|---|---|
| स्त्री | [9]स्त्रियौ | स्त्रियः |
| स्त्रीम्, स्त्रियम् | स्त्रियौ | [10]स्त्रीः, स्त्रियः |
| स्त्रिया | स्त्रीभ्याम् | स्त्रीभिः |

१. A.B. प्रतौ नास्ति । २. पा० वर्षाभूणाम् C.।
३. पा० वर्षाभ्वाम् C.। ४-५. A.B. प्रतौ नास्ति ।
६. संयोगात् [सि० २-१-५२] इय् A.।
७. श्रियै, श्रियाः, श्रियाः, श्रियाम्-एतानि रूपाणि न सन्ति B.।
८. A.B. प्रतौ नास्ति । ९. स्त्री च [२-२-६१ का०] इय् A.।
१०. वाऽम्-शसि[सि० २-१-५५] C.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| स्त्रियै | स्त्रीभ्याम् | स्त्रीभ्यः |
| स्त्रियाः | स्त्रीभ्याम् | स्त्रीभ्यः |
| स्त्रियाः | स्त्रियोः | स्त्रीणाम् |
| स्त्रियाम् | स्त्रियोः | स्त्रीषु |
| सं० हे स्त्रि | हे स्त्रियौ | हे स्त्रियः |
| [1]अतिस्त्रिः | अतिस्त्रियौ | [2]अतिस्त्रयः |
| [3]अतिस्त्रिम्, अतिस्त्रियम् | अतिस्त्रियौ | [4]अतिस्त्रीन्, अतिस्त्रियः |
| अतिस्त्रिणा | अतिस्त्रिभ्याम् | अतिस्त्रिभिः |
| [5]अतिस्त्रये | अतिस्त्रिभ्याम् | अतिस्त्रिभ्यः |
| अतिस्त्रेः | अतिस्त्रिभ्याम् | अतिस्त्रिभ्यः |
| अतिस्त्रेः | अतिस्त्रियोः | अतिस्त्रीणाम् |
| [6]अतिस्त्रौ | अतिस्त्रियोः | अतिस्त्रिषु |
| सं०हे [7]अतिस्त्रे | हे अतिस्त्रियौ | हे [8]अतिस्त्रयः |
| [9]लक्ष्मीः | लक्ष्म्यौ | लक्ष्म्यः |
| लक्ष्मीम् | लक्ष्म्यौ | लक्ष्मीः |
| लक्ष्म्या | लक्ष्मीभ्याम् | लक्ष्मीभिः |
| लक्ष्म्यै | लक्ष्मीभ्याम् | लक्ष्मीभ्यः |
| लक्ष्म्याः | लक्ष्मीभ्याम् | लक्ष्मीभ्यः |

---

१. अतिक्रान्ता स्त्री येन सः अतिस्त्रिः । एतच्छब्दस्य रूपाणि प्रत्यन्ते चतुष्टयशब्दस्य रूपाणां पश्चाद् वर्तन्ते A.B. । स्त्रीमतिक्रान्तो योऽसौ अतिस्त्रिः । गोश्चान्ते ह्रस्वोऽनंशिसमासेयो बहुव्रीहौ [सि० २-४-९६] C.।

२. अतिस्त्रियः A.B.C.।

३. अत्र अमिकार शशि च गौरप्रधानेत्यादिना ह्रस्वो न भवति अतिस्त्रीम् A.B.।

४. C. प्रतौ तु अतिस्त्रीम्, अतिस्त्रीः इति रूपे स्तः ।

५. अतिस्त्रिये A.B.C.।

६. षष्ठ्याः सप्तम्याश्च ङसि ह्रस्वो न भवति - अतिस्त्रियाम् A.B.।
C. प्रतौ अपि अतिस्त्रियाम् इति रूपं वर्तते ।

७. अतिस्त्रि C.। ८. अतिस्त्रियः A.B.C. ।

९. A.B. प्रतौ एतच्छब्दस्य रूपाणि प्रत्यन्तेऽतिस्त्रिशब्दस्य रूपाणां पश्चाद् वर्तन्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| लक्ष्म्याः | लक्ष्म्योः | [1]लक्ष्मीणाम् |
| लक्ष्म्याम् | लक्ष्म्योः | लक्ष्मीषु |
| सं०हे [2]लक्ष्मि | हे लक्ष्म्यौ | हे लक्ष्म्यः |

एवं तरी-अवी-तन्त्रीप्रमुखाः ।

एवम्-

| | | |
|---|---|---|
| जरा | [3]जरसौ, जरे | जरसी, जरसः, जराः |
| जरसम्, जराम् | जरसौ, जरे | जरसी, जरसः, जराः |
| जरसा, जरया | जराभ्याम् | जराभिः |
| जरसे, जरायै | जराभ्याम् | जराभ्यः |
| जरसः, जरायाः | जराभ्याम् | जराभ्यः |
| जरसः, जरायाः | जरसोः, जरयोः | जरसाम्, जराणाम् |
| जरसि, जरायाम् | जरसोः, जरयोः | जरासु |
| सं० हे जरे | हे जरसौ, जरे | हे जरसी, जरसः, जराः |

समासे त्वतिपूर्वस्त्रिलिङ्गः ।

| | | |
|---|---|---|
| [4]अतिजरः | अतिजरसौ, अतिजरौ | अतिजरसः, अतिजराः |
| अतिजरसम्, अतिजरम् | अतिजरसौ, अतिजरौ | अतिजरसः, अतिजरान् |
| [5]अतिजरसिन, अतिजरसा, अतिजरेण | अतिजराभ्याम् | [6]अतिजरसैः, अतिजरैः |
| अतिजरसे, अतिजराय | अतिजराभ्याम् | अतिजरेभ्यः |
| अतिजरसः, अतिजरात् | अतिजराभ्याम् | अतिजरेभ्यः |

---

१. पा० लक्ष्मीनाम् A.B.C.। २. पा० लक्ष्मीः C.।

३. जरा जरस् स्वरे वा [२-३-२४ का०] A.।

४. जरामतिक्रान्तो यः स इति अन्यपदार्थे प्रकनस्याम स्त्रियामादादीनां चेति ह्रस्वः [२-४-५२ का० सूत्रस्य वृत्तौ एषः पाठो वर्तते] सर्वत्र इति ह्रस्वत्वेति सूत्रकार्यनिमित्तं कार्यमित्येष निर्देशः A.।

५. कृते एकदेशस्य विकृतित्वात् जरस् आदेशः । तथा – इनादेशः । तेन अतिजरसिन A.। C. प्रतौ एतद् रूपं नास्ति ।

६. ज्ञापकज्ञापिता विधयो ह्यनित्याः । 'एकदेशविकृतमनन्यवद्' इति परिभाषया एष्करणे जराशब्दस्य (शब्दः) आकारान्तो न ज्ञेयः A.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतिजरसः, अतिजरस्य अतिजरसोः,अतिजरयोः अतिजरसाम्, अतिजराणाम्

अतिजरसि, अतिजरे अतिजरसोः, अतिजरयोः अतिजरेषु

सं०हे अतिजर हे अतिजरसौ, अतिजरौ हे अतिजरसः,अतिजराः

स्त्रीलिङ्गे अतिजरा जरावत् ।

नपुंसके तु–

[1]अतिजरः,[2]अतिजरसम्, [3]अतिजरम् अतिजरसी, अतिजरे अतिजरांसि,अतिजराणि

[4]अतिजरः,[5]अतिजरसम्, अतिजरम् अतिजरसी, अजितरे अतिजरांसि,अतिजराणि

शेषं पुंलिङ्गवत् ।

सं० हे [6]अतिजरः,अतिजरसम्, अतिजरम् हे अतिजरसी,अतिजरे हे अतिजरांसि,अतिजराणि

★

अथ त्रिलिङ्गाः लिख्यन्ते ।

[7]शुक्लः कीलालपाश्चैव शुचिश्च [8]ग्रामणीः सुधीः ।

पटुः कमललूः कर्ता [9]सुमाता स्युस्त्रिलिङ्गकाः ॥१॥

तत्र प्रथममकारान्तः ।

[10]शुक्लः शुक्लौ शुक्लाः

इत्यादि पुंलिङ्गे देववत् ।

[11]स्त्रीलिङ्गे मालावत्- यथा- शुक्ला शुक्ले०

[12]नपुंसके कुण्डवत्- शुक्लम् शुक्ले०

१.४. A.B. प्रतौ एतद् रूपं नास्ति । २.५ C. प्रतौ एतद् रूपं नास्ति ।

३. क्लीबे व्याकरणसूत्रम् अतःस्यमोऽम् [सि० १-४-५७] अकारान्तस्य नपुंसकलिङ्गस्य सम्बन्धिनोः स्यमोरमादेशो भवति । अमोऽकारोच्चारणं जरसादेशार्थम् । पुनर्व्याकरणे जरसो वा [सि० १-४-६०] अनेन स्यमोर्विकल्पेन लुग् A.।

६. A.B.प्रतौ सम्बोधनस्य रूपाणि न सन्ति । प्रतौ केवलम् अतिजर इत्येकमेव रूपं वर्तते ।

७. पा० शुक्लकीला० A.B.। ८. पा० ग्रामणीसुधीः A.B.।

९. पा० सुमतो बहुरासनौ A.B.। १०. पा० शुक्लः पुंलिङ्गे देववत् C.।

११.१२. A.B. प्रतौ एषः पाठ एव नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१]शुक्लः शुभ्रस्तथा श्वेतो विशदै[२]श्येतपाण्डुरौ[३]: ।
अवदातः सितो गौरोऽवलक्षो धवलोऽर्जुनः[४] ॥१॥
कृष्णनीलासितश्[५]यामकालश्यामलचेटकाः ।
[६]पीतो गौरो हरिद्राभो रक्तो रोहितलोहितौ ॥२॥

एते सर्वेऽपि शुक्लवद् ज्ञातव्याः ।

अथ आकारान्ताः ।

कीलालपाः पुंस्त्रीलिङ्गयोः पूर्ववत् ।

नपुंसके-

| | | |
|---|---|---|
| कीलालपम् | कीलालपे | कीलालपानि |
| कीलालपम् | कीलालपे | कीलालपानि |

इत्यादि वनवत् ।

एवं सोमपा-शिशुपा[७]प्रभृतयः ।

अथ इकारान्ताः ।

शुचिशब्दः पुंसि अग्निवत् ।

[८]स्त्रियां तु-

| | | |
|---|---|---|
| शुचिः | शुची | शुचयः |
| शुचिम् | शुची | शुचीः |
| शुच्या | शुचिभ्याम् | शुचिभिः |
| [शुच्यै]शुचये[९] | शुचिभ्याम् | शुचिभ्यः |
| [शुच्याः]शुचेः | शुचिभ्याम् | शुचिभ्यः |
| [शुच्याः]शुचेः | शुच्योः | शुचीनाम् |

१. पा० शुक्लशु० A.B. । २. पा० ०दश्वेति० A.B.।
३. पा० ०पाण्डुरः C.। ४. पा० ०र्जुनाः C.।
५. पा० ०सितः श्यामः C.। ६. पा० पीतगौरो C.।
७. पा० शिशुपाः प्रमुखाः C.। ८. स्त्रियां तु बुद्धिवत् C. । तत्र रूपाणि न सन्ति ।
९. केचित् स्त्रियां वर्तमानस्य शुचिशब्दस्य विकल्पमिच्छन्ति । तन्मते यदा शुचिशब्दः पुंसि स्त्रियां नपुंसके च वर्तते तदा पुंनपुंसकयोः वृत्तिर्व्यवच्छिद्यति । स्त्रियां तु स्वत एव प्रवृत्तत्वात् । तेन ह्रस्वश्च ङवति [२-२-५ का०] इत्यादिना नदीवद्भावो भवत्येव । तथा स्त्रियां बुद्धिवत् A.B.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| [शुच्याम्]शुचौ | शुच्योः | शुचिषु |
| सं० हे शुचे | हे शुची | हे शुचयः |

नपुंसके-

| | | |
|---|---|---|
| [1]शुचि | शुचिनी | शुचीनि |
| शुचि | शुचिनी | शुचीनि |
| शुच्या | शुचिभ्याम् | शुचिभिः |
| [2]शुचिने, शुचये | शुचिभ्याम् | शुचिभ्यः |
| शुचिनः, शुचेः | शुचिभ्याम् | शुचिभ्यः |
| शुचिनः, शुचेः | शुचिनो, शुच्योः | शुचीनाम् |
| शुचिनि, शुचौ | शुचिनोः, शुच्योः | शुचिषु |
| सं० हे शुचे, शुचि | हे शुचिनी | हे शुचीनि |

[3]अथ ईकारान्ताः ।

ग्रामणीः पुंस्त्रियोः पूर्ववत् ।

नपुंसके तु-

| | | |
|---|---|---|
| ग्रामणि | ग्रामणिनी | ग्रामणीनि |
| ग्रामणि | ग्रामणिनी | ग्रामणीनि |
| ग्रामण्या, ग्रामणिना | ग्रामणिभ्याम् | ग्रामणिभिः |
| ग्रामण्ये, ग्रामणिने | ग्रामणिभ्याम् | ग्रामणिभ्यः |
| ग्रामण्यः, ग्रामणिनः | ग्रामणिभ्याम् | ग्रामणिभ्यः |
| ग्रामण्यः, ग्रामणिनः | ग्रामण्योः, ग्रामणिनोः | ग्रामण्याम्, [4]ग्रामणीनाम् |
| ग्रामण्याम्, ग्रामणिनि | ग्रामण्योः, ग्रामणिनोः | ग्रामणिषु |
| सं० हे ग्रामणि, ग्रामणे | हे ग्रामणिनी | हे ग्रामणीनि |

एवमग्रणीप्रभृतयः

शोभना धीर्यस्येति बहुव्रीहौ सुधीः । पुंस्त्रियोः पूर्ववत् ।

---

१. शुचि शुचिनी शुचीनि-वारिवत् A.B.।

२. नामिनः स्वरे [२-२-१२ का०] अनेन नुरागमः A.।

३. अथ ईकारान्ताः पूर्ववत् A.B., पश्चाद् ग्रामणि-इति रूपाणि सन्ति ।

४. पा० ग्रामणिनाम् A.B.C.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नपुंसके तु–

| | | |
|---|---|---|
| सुधि | सुधिनी | सुधीनि |
| सुधि | सुधिनी | सुधीनि |
| [1]सुधिया, सुधिना | सुधिभ्याम् | सुधिभिः |
| सुधिये, सुधिने | सुधिभ्याम् | सुधिभ्यः |
| सुधियः, सुधिनः | सुधिभ्याम् | सुधिभ्यः |
| सुधियः, सुधिनः | सुधियोः, सुधिनोः | सुधियाम्, [2]सुधीनाम् |
| सुधियि, सुधिनि | सुधियोः, सुधिनोः | सुधिषु |
| सं० हे [3]सुधि, सुधे | हे सुधिनी | हे सुधीनि |

एवमुपार्जितश्री–यवक्री–त्यक्तह्रीप्रभृतयः[4] ।

अथ उकारान्ताः ।

पटुशब्दः पुंसि शम्भुवत् ।

[5]स्त्रियाम्– पट्वी पट्व्यौ पट्व्यः

इत्यादि नदीवत् ।

| | | | |
|---|---|---|---|
| विकल्पेन – | पटुः | पटू | पटवः |
| | पटुम् | पटू | पटूः |
| | पट्वा | पटुभ्याम् | पटुभिः |

शेषं [6]शम्भुवत् ।

नपुंसके तु–

| | | |
|---|---|---|
| पटु | पटुनी | पटूनि |
| पटु | पटुनी | पटूनि |

---

१. धातोरिवर्णो [वर्णस्येयुव् स्वरे प्रत्यये सि० २-१-५०] इय् A.। सुधीः [२-२-५७ का०] इय्।

२. पा० सुधिनाम् A.B.C.।

३. नामिनो लुग् वा [सि० १-४-६१] सर्वत्र C.।

४. A.B. प्रतौ नास्ति

५. उतो गुणवचनादखरुसंयोगोपधाद्वा [२-४-५० का० सूत्रस्यवृत्तौ एषः पाठो वर्तते] इति विकल्पेन ईप्रत्यये A.B.। स्वरादुतो गुणादखरोः [सि० २-४-३५] इति वा ङीप्रत्यये पट्वी नदीवत्, विकल्पे तु धेनुशब्दवत् । नपुंसके तु मधुवत् C.।

६. केचित् स्त्रियां ह्रस्वश्च ङवति [२-२-५ का०] इत्यादिना नदीवद्भावं विकल्पयन्ति । तन्मते धेनुवत् A.B.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| [1]पटुना | पटुभ्याम् | पटुभिः |
| पटुने, पटवे[2] | पटुभ्याम् | पटुभ्यः |
| पटुनः, पटोः | पटुभ्याम् | पटुभ्यः |
| पटुनः, पटोः | पटुनोः, पट्वोः | पटूनाम् |
| पटुनि, पटौ | पटुनोः, पट्वोः | पटुषु |
| सं०हे पटु, पटो | हे पटुनी | हे पटूनि |

एवं गुरु-लघु-मृदु-स्वादु-चारुप्रभृतयः ।

अथ ऊकारान्ताः ।

[3]कमललूः पुंसि स्त्रियां च यवलूवत् ।

नपुंसके-

| | | |
|---|---|---|
| [4]कमललु | कमललुनी | कमललूनि |
| कमललु | कमललुनी | कमललूनि |
| कमललुना,कमलल्वा | कमललुभ्याम् | कमललुभिः |
| कमललुने, कमलल्वे | कमललुभ्याम् | कमललुभ्यः |
| कमललुनः,कमलल्वः | कमललुभ्याम् | कमललुभ्यः |
| कमललुनः,कमलल्वः | कमललुनोः,कमलल्वोः | कमललूनाम्,कमलल्वाम् |
| कमललुनि,कमलल्वि | कमललुनोः,कमलल्वोः | कमललुषु |
| सं०हे कमललु,कमललो | हे कमललुनी | हे कमललूनि |

एवमन्येऽपि ।

**कटप्रूः पुंसि स्त्रियां च पूर्ववत् ।**

**[5]नपुंसके-**

| | | |
|---|---|---|
| **कटप्रु** | [6]कटप्रुणी | [7]कटप्रूणि |
| **कटप्रु** | [8]कटप्रुणी | [9]कटप्रूणि |
| कटप्रुणा, कटप्रुवा | कटप्रुभ्याम् | कटप्रुभिः |

१. पा० पटुना, पट्वा A.B.।    २. पा० पट्वे A.B.।

३. कमलूशब्दः A.B.।    ४. C.प्रतौ सर्वरूपेषु 'कमलु' इति पाठोऽस्ति ।

५. नपुंसके कमललूवत्, पश्चात् प्रथमायाः द्वितीयायाश्च सर्वाणि तथा तृतीयायाःएकद्विवचनयोः रूपाणि सन्ति C.।

६.८. कटप्रूनी A.B.।    ७.९. कटप्रूनि A.B.।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

| | | |
|---|---|---|
| कटप्रुणे, कटप्रुवे | कटप्रुभ्याम् | कटप्रुभ्यः |
| कटप्रुणः,कटप्रुवः | कटप्रुभ्याम् | कटप्रुभ्यः |
| कटप्रुणः,कटप्रुवः | कटप्रुणोः,कटप्रुवोः | कटप्रूणाम्,[1]कटप्रुवाम् |
| कटप्रुणि,कटप्रुवि | कटप्रुणोः,कटप्रुवोः | कटप्रुषु |
| सं०हे कटप्रु, कटप्रो | हे कटप्रुणी[2] | हे कटप्रूणि[3] |

[4]एवं तनभ्रू-सुभ्रूप्रभृतयः ।

अथ ऋकारान्ताः ।

[5]पुंसि कर्तृशब्दः –

| | | |
|---|---|---|
| [6]कर्ता | [7]कर्तारौ | कर्तारः |
| कर्तारम् | कर्तारौ | कर्तॄन् |
| कर्त्रा | | |
| सं० हे कर्तः | हे कर्तारौ | हे कर्तारः |

सर्वत्र पितृवत् ।

[8]स्त्रियां तु कर्त्री नदीवत् ।

नपुंसके–

| | | |
|---|---|---|
| [9]कर्तृ | कर्तृणी | कर्तॄणि |
| कर्तृ | कर्तृणी | कर्तॄणि |
| कर्तृणा, कर्त्रा | कर्तृभ्याम् | कर्तृभिः |
| कर्तृणे, कर्त्रे | कर्तृभ्याम् | कर्तृभ्यः |
| कर्तृणः, कर्तुः | कर्तृभ्याम् | कर्तृभ्यः |
| कर्तृणः, कर्तुः | कर्तृणोः, कर्त्रोः | कर्तॄणाम् |

---

१. पा० कटप्वाम् A.B.। २.३. कटप्रूनी A.B.।

४. पा० एवं सुभ्रूः C.।

५. कर्तृशब्दप्रभृतयः । कर्ता कर्तारौ कर्तारः इत्यादि धातृवत् A.B.।

६. आ सौ सिलोपश्च [२-१-६४ का०] सिलोप, ऋ आ A.।

७. धातोस्तृशब्दस्यार् [२-१-६८ का०] इति आर् A.।

८. स्त्रियां तु नदादि [नदाद्यन्चिवाह्यन्स्यन्तृसखिनान्तेभ्य ई २-४-५० का०] सूत्रेण ईप्रत्यये कर्त्री नदीवत् । स्त्रियां तु स्त्रियां नृतोऽस्वस्रादेर्ङीः [सि० २-४-१] कर्त्री नदीवत् C.।

९. C. प्रतौ प्रथमाया रूपाणि सन्ति शेषं पुंलिङ्गवत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| कर्तृणि, कर्तरि | कर्तृणो, कर्त्रोः | कर्तृषु |
| सं०हे [1]कर्तः, [2]कर्तृ | हे कर्तृणी | हे कर्तृणि |

[3]एवं तृजन्त-तृनन्त-पक्तृ-भोक्तृ-श्रोतृप्रभृतयः ।

सुमातृशब्दः पुंसि सुपितृवत् । स्त्रियां तु मातृवत् । नपुंसके तु नपुंसककर्तृवत् ।

★

अथ सर्वनामगणा लिख्यन्ते ।

| | | |
|---|---|---|
| सर्वः | सर्वौ | सर्वे |
| सर्वम् | सर्वौ | सर्वान् |
| सर्वेण | सर्वाभ्याम् | सर्वैः |
| सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| सर्वस्य | सर्वयोः | सर्वेषाम् |
| सर्वस्मिन् | सर्वयोः | सर्वेषु |
| सं०हे सर्व | हे सर्वौ | हे सर्वे |

स्त्रियाम्-

| | | |
|---|---|---|
| सर्वा | सर्वे | सर्वाः |
| सर्वाम् | सर्वे | सर्वाः |
| सर्वया | सर्वाभ्याम् | सर्वाभिः |
| सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |
| सर्वस्याः | सर्वयोः | सर्वासाम् |
| सर्वस्याम् | सर्वयोः | सर्वासु |
| सं०हे सर्वे | हे सर्वे | हे सर्वाः |

नपुंसके-

| | | |
|---|---|---|
| सर्वम् | सर्वे | सर्वाणि |

१. नास्ति B.। २. नास्ति A.।

३. पा० एवं पक्तृ-भोक्तृ-श्रोतृप्रभृतयः A.B. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| सर्वम् | सर्वे | सर्वाणि |

शेषं पुंलिङ्गवत् ।

[१]अकप्रत्ययेऽप्येवं यथा–

| | |
|---|---|
| सर्वकः | सर्वकौ० |

[२]स्त्रियां तु–

| | | |
|---|---|---|
| सर्विका | सर्विके | सर्विकाः |

इत्यादि स्त्रीलिङ्गे सर्वावत् ।

नपुंसके–

| | | |
|---|---|---|
| सर्वकम् | सर्वके | सर्वकाणि |
| सर्वकम् | सर्वके | सर्वकाणि |

शेषं पुंलिङ्गवत् । एवं विश्वशब्दोऽपि ।

[३]उभशब्दो द्विवचनान्तः ।

उभौ उभौ उभाभ्याम् उभाभ्याम् उभाभ्याम् उभयोः उभयोः

[४]स्त्रियाम् – [५]उभे उभे शेषं पुंलिङ्गवत् ।
नपुंसके – उभे उभे शेषं पुंलिङ्गवत् ।

[६]अकि–

[७]उभकौ उभकौ उभकाभ्याम् उभकाभ्याम् उभकाभ्याम् उभकयोः उभकयोः
[८]स्त्रियां तु– उभके उभिके उभिकाभ्याम्३ उभिकयोः उभिकयोः
नपुंसके तु– उभके उभके शेषं पुंलिङ्गवत् ।

---

